दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

■ पृष्ठ-10 ■ वर्ष-5 ■ अङ्क-306 | 1 | अगस्त 25, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com


**पञ्चाङ्गम्**

वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् श्रावणशुक्लत्रयोदशी
भाद्रपद 09 प्रविष्टांशः मङ्गलमयः भवेत्


2 मुख्यमन्त्री सुक्खू उक्तवान्— गान्धीजयन्तीतः द्विलक्षपरिवारेभ्यः १५००-१५०० रुप्यकाणि, ३०० मात्रक-निःशुल्कविद्युत्

4 कुमारभास्करवर्म- संस्कृत-पुरातनाध्ययन- विश्वविद्यालये २०२६ वर्षस्य दीक्षारम्भकार्यक्रमः भव्यरूपेण सम्पन्नः

9 सहायक-प्राध्यापक-नियुक्तौ बृहन्निर्णयः २०२६ तमवर्षस्य परिनियमः स्थगितः, पञ्चदशदिनेषु उच्चस्तरीय-समीक्षा-समितेः गठनम्


## विदेश-मन्त्री डॉ. एस. जयशङ्करः रूस-देशस्य राष्ट्रपतिना व्लादिमिर-पुतिन्-इत्यनेन सह मेलनमकरोत्



विदेशमन्त्री डा. एस. जयशङ्करः क्रेमलिन-भवने रूसस्य राष्ट्रपतिना व्लादिमीर पुतिन इत्यमुना सह सौहार्द-मेलनं अकरोत्। अस्मिन् प्रतिनिधि-मण्डले रूस-देशे भारतीय राजदूतः विनय कुमारः अथ च संयुक्त सचिवः मयङ्क-सिंहः अपि उपस्थितौ आस्ताम्। उपवेशने तावत् द्विपक्षीय-व्यापारः, आर्थिक सहयोगः, सहैव आगामि-उच्च-स्तरीय-शिखर सम्मेलनानि इति विषयेषु मुख्यतया चर्चा समजायत्। अत्रावसरे सम्भाषमाणः डा. जयशङ्करः भारत-रूस-देशयोः सुदृढं वर्धमानं च सहभागितां प्रतिपादितवान्। सः प्रधानमन्त्रिणः नरेन्द्रमोदिनः शुभकामनाः राष्ट्रपति-पुतिन इत्यस्मै समर्पयत्, तस्य व्यक्तिगत सन्देशं च तस्मै निवेदितवान्। विदेशमन्त्रिणा प्रतिपादितं यत् व्यापार-ऊर्जा-उर्वरक आण्विक-क्षेत्रेषु उभयोः देशयोः सहयोगः अत्यधिकं प्रवृद्धः वर्तते। सः असूचयत् यत् प्रधानमन्त्री मोदी एससीओ-शिखर सम्मेलने राष्ट्रपतिना पुतिन-महोदयेन सह मेलनाय, अथ च ब्रिक्स शिखर सम्मेलनार्थं तस्य भारत-आगमने स्वागतं कर्तुम् उत्सुको वर्तते। इतः प्राक्तन-दिवसे विदेशमन्त्री रूस-देशस्य प्रथम-उप-प्रधानमन्त्रिणा डेनिस-मन्तुरोव इत्यमुना सह व्यापार-आर्थिक-वैज्ञानिक-प्रौद्योगिक-सांस्कृतिक-सहयोगाय भारत-रूस-अन्तर्सर्वकारीय-आयोगस्य सहाध्यक्षताम् अकरोत्। तत्र डॉ. जयशङ्करः अवदत् यत् भारत-रूस-सम्बन्धाः निरन्तरं स्वकीयां दृढतां अनुकूलन-क्षमतां च प्रदर्शितवन्तः। विदेशमन्त्री स्वकीय-रूस-समकक्ष्येण सर्गेई लावरोव इत्यमुनापि सह क्षेत्रीय-वैश्विक-विषयेषु विचार-विनिमयं करिष्यति।

## बीजिंग-नगरं सम्प्राप्तः अजित डोभालः; सीमा-प्रकरणे पंचविंशतितमस्य उच्चस्तरीय-विशेष-प्रतिनिधि-उपवेशनस्य नेतृत्वं करिष्यति



भारतस्य राष्ट्रिय-सुरक्षा-परामर्शकः अजित डोभालः द्वि-दिवसीय-चीन यात्रायै बीजिंग-नगरं सम्प्राप्तवान्। अत्रावसरे श्रीडोभालः स्वकीय-चीन समकक्षेण विदेशमन्त्रिणा च वाङ्ग यी इत्यमुना सह सीमा-विषये आयोज्यमानस्य द्वयोः देशयोः पञ्चविंशतितमस्य विशेष-प्रतिनिधि-वार्ता-सत्रस्य सहाध्यक्षतां करिष्यति। चीन-विदेश मन्त्रालयस्य प्रवक्ता लिन् जियान् वार्ताहर-सम्मेलने न्यवेदयत् यत् श्रीडोभालः श्रीवाङ्ग इत्यसौ च सीमा-विवादं समेत्य द्विपक्षीय-क्षेत्रीय अथ अन्ताराष्ट्रिय-सम्बन्धेषु गभीरं विचार-विमर्शं करिष्यतः। विंशत्यधिक-द्विसहस्रतमे वर्षे गलवान्-उपत्यकायां सङ्घर्षानन्तरं पूर्व-लद्दाख क्षेत्रे दीर्घकालिक-सैन्य-चिन्ता-कारणात् भारत-चीन-सम्बन्धेषु महती कटुता समागता आसीत्, किन्तु उभौ पक्षौ सम्बन्धेषु स्थिरताम् आनेतुं निरन्तरं प्रयासं कृतवन्तौ। चतुश्शताधिक-त्रिसहस्र-किलोमीटर-दीर्घतमस्य भारत-चीन-सीमा-विवादस्य समग्रावबोधाय त्र्यधिक-द्विसहस्रतमे वर्षे एषा विशेष-प्रतिनिधि-व्यवस्था आरब्धा आसीत् । अस्मात् उपवेशनात् पूर्वं भारतस्य विदेशमन्त्री डा. एस. जयशङ्करः शनिवासरे पुनरुक्तवान् यत् सीमा-क्षेत्रेषु शान्तिः स्थिरता च चीन-देशेन सह उत्तमाय सम्बन्धाय अनिवार्या वर्तते। यात्रावधौ राष्ट्रिय-सुरक्षा-परामर्शकः चीन-देशस्य उप-राष्ट्रपतिना हान् जेङ्ग इत्यमुना सहापि सौहार्द मेलनं करिष्यति।

## वैश्विक-वाणिज्ये भारतस्य सुदृढ पदक्षेपः, अर्थव्यवस्थायाः प्रतिनिधित्वं कुर्वद्भिः राष्ट्रैः सह 'मुक्त-व्यापार-सन्धेः' वार्ता प्रचलति - पीयूष गोयलः

केन्द्रीय-वाणिज्य-तथा-उद्योग-मन्त्री पीयूष गोयलः जापान-देशस्य चतुर्दिवसीय प्रवासे वर्तते। तत्र व्यापार-समवायम् उद्दिश्य तेन प्रोदीरितं यत् भारतं पञ्चदश-ट्रिलियन्-डॉलर्-परिमितस्य जी.डी.पी.-सम्पदः प्रतिनिधित्वं कुर्वद्भिः विविध-राष्ट्रैः सह वाणिज्य-वार्ता विधत्ते । अस्माकं देशस्य मुक्त-व्यापार-संधिः जगद्व्यापारस्य पंचसप्ततिः भागं परिपूरयिष्यन्ति, येन भारतस्य प्रतिष्ठा सुदृढा भविष्यति।

## अद्यतनीयं सुभाषितम्

**यात्यधोऽधो व्रजत्युच्चैः नरः स्वैरेव कर्मभिः।**
**कूपस्य खनिता यद्वत् प्राकारस्येव कारकः॥**

(हितोपदेश, सुहृद्भेद- ४८)

अर्थात्- मनुष्य अपने ही कर्मों से कुआं खोदने वाले के समान नीचे और राजभवन बनाने वाले के समान ऊपर जाता है; अर्थात् मनुष्य अपना उच्च (अच्छे) कर्मों से उन्नति को और हीन (खराब) कर्मों से अवनति को पाता है।






## अद्यारभ्य सम्पूर्णे देशे संस्कृतसप्ताहस्य शुभारम्भः




हिमसंस्कृतवार्ता। श्रावणपूर्णिमावसरे सम्पूर्णे देशे सोल्लासेन संस्कृतदिवसस्याचारणं भवति। ततः दिवसत्रयपूर्वं संस्कृतसप्ताहस्य शुभारम्भः भवति। अस्मिन्नावसरे २५ अगस्ततः ३१ अगस्तपर्यन्तं संस्कृतसप्ताहस्य परिपालनं भविष्यति। अस्मिन्नावसरे सम्पूर्णे देशे शैक्षणिकसंस्थासु संस्कृतसप्ताहस्य सज्जाः पूर्णाः सन्ति। सर्वत्र संस्कृतमयं वातावरणं दृश्यते। संस्कृतसप्ताहवसरे हिमाचलप्रदेशस्य सम्पूर्णेषु विद्यालयेषु हिमाचलराजकीयसंस्कृत-शिक्षकपरिषद् पक्षतः संस्कृतसप्ताहस्याचरणस्य योजना निर्दिष्टा अस्ति, यस्यानुगुणं प्रतिदिनं कार्यक्रमाः भविष्यन्ति। परिषदः प्रदेशाध्यक्षेणोक्तं यत् शिक्षाविभागस्य निदेशकाय अस्मिन्नविषये प्रपत्रं प्रेषितम् अस्ति। ध्यातव्यमस्ति यत् संस्कृतं हिमाचलस्य द्वितीयभाषा अस्ति। हिमसंस्कृतवार्तापक्षतः सर्वेभ्यः संस्कृतसप्ताहस्य शुभकामनाः।

## झारखण्ड-लोक-सेवा-परीक्षा-विवादे निष्पक्ष-अन्वेषणाय उच्चतम न्यायालयस्य पीठेन केन्द्र-सर्वकारतः झारखण्ड-शासनाच्च आहूतं प्रत्युत्तरम्।

भारतस्य उच्चतम न्यायालयेन झारखण्ड-राज्यस्य संयुक्त-नागरिक-सेवा-परीक्षायां सञ्जातानाम् अनियमितानाम् सी.बी.आई.-दलेन निष्पक्ष-विशोधनाय याचिकां स्वीकृत्य केन्द्र-राज्य-शासनाभ्यां सूचना-पत्रं प्रेषितम्। मुख्य न्यायाधिपतेः सूर्य-कान्तस्य न्याय-पीठेन झारखण्ड-लोकसेवा आयोगाय अपि निर्देशो प्रदत्तः। उच्च न्यायालयः पूर्वमेव परीक्षा-निरस्तीकरणस्य निर्णयं स्थगितवान्।

## उज्जयिन्यां श्रावण-मासस्य अन्तिम-सोमवासरे भगवान् महाकालः पञ्चामृतेन अभिषिक्तः भस्मना च समलङ्कृतः

उज्जयिन्यां श्रावण-मासस्य अन्तिम-सोमवासरे भगवान् महाकालः पञ्चामृतेन अभिषिक्तः भस्मना च समलङ्कृतः। मन्दिर-द्वाराणि ब्रह्म मुहूर्ते सार्धद्वि वादने उद्घाटितानि। गतसायङ्काले मन्दिरात् प्रस्थिता शोभायात्रा रामघाटं यावत् सञ्जाता , यत्र क्षिप्रा नद्याः पावन-जलेन भगवतः चन्द्रमौलेश्वरस्य विशेष-अर्चनमभवत् ।

## चिराग-पासवानः- 'पी.एम्.एफ.एम्.ई.' योजना-माध्यमेन द्विलक्षाधिकेभ्यः सूक्ष्म-खाद्य-उद्यमिभ्यः अभ्युदयः साध्यते

केन्द्रीय-खाद्य-प्रसंस्करणमन्त्री चिराग पासवानः नवदेहल्यां सम्मेलनम् सम्बोध्य प्रावोचत् यत् 'पी.एम्.एफ.एम्.ई.' योजना-माध्यमेन द्विलक्षाधिकेभ्यः सूक्ष्म-खाद्य-उद्यमिभ्यः अभ्युदयः साध्यते। तेन प्रकटीकृतं यत् अस्याः योजनायाः फलम् आसाद्य दश-लक्ष-जनाः साक्षात्-वृत्तिम् अवाप्नुवन्। एषा योजना उद्यमिता-क्षेत्रे महिलानां सहभागिताम् अपि संवर्धयति।


## भारतस्य ब्रिक्स-अध्यक्षता 'मानवता प्रथमम्' इति मौलिक-सूत्रे प्रतिष्ठिता वर्तते - विदेश-कार्य-सचिवः

लखनऊ-नगरे समनुष्ठिते अष्टादशे ब्रिक्स-अकादमिक-अधिवेशने विदेश-कार्य-सचिवः सुधाकर-दलेला अब्रवीत् यत् भारतस्य ब्रिक्स-अध्यक्षता 'मानवता प्रथमम्' इति मौलिक-सूत्रे प्रतिष्ठिता वर्तते। तेन प्रकटीकृतं यत् अयं सङ्घः नवोन्मेषं सहयोगञ्च प्रवर्धयितुं यतते। अस्याः प्रक्रियायाः भागत्वेन राष्ट्रस्य त्रिंशत्-नगरेषु चतुःशताधिकानि सम्मेलनानि निर्व्यूढानि सन्ति ।

## संयुक्त राष्ट्र-सङ्घस्य मरुस्थलीकरण-प्रतिरोध-परिषदि भारतस्य प्रतिनिधित्वम्

संयुक्त राष्ट्र-सङ्घस्य मरुस्थलीकरण-प्रतिरोध-परिषदि भारतस्य प्रतिनिधित्वं कुर्वन् केन्द्रीय-पर्यावरण-मन्त्री भूपेन्द्र यादवः प्रावोचत् यत् भूमेः और्वर्य-रक्षणम् न तु केवलं व्यय-मात्रम्, अपितु तत् तु भावि-सन्ततेः जीवन-धारणाय अन्न-जल-पर्यावरणेषु विहितः महान् अभ्युदयिक-निवेशः अस्ति।

# HP Vidhansabha Session - मुख्यमन्त्रिणः प्रत्यागमनेन राष्ट्रगान-राष्ट्रगीतयोः विषये पुनः कोलाहलः, कार्यविधिः स्थगिता



**हिमसंस्कृतवार्ताः - शिमला।** मुख्यमन्त्रिणः सोमवासरे सायं सदने आगमने राष्ट्रगानस्य राष्ट्रगीतस्य च विषये पुनः कोलाहलः अभवत्। विपक्षेण अस्य विषयस्य सम्बन्धितां सदनस्य दृश्यावलीं (फुटेज) प्रकाशयितुं आग्रहः कृतः। विपक्षस्य सदस्यैः उक्तं यत् दृश्यावल्याः सार्वजनिककरणेन सम्पूर्णघटनाक्रमस्य वास्तविकस्थितिः स्पष्टा भविष्यति। अस्मिन् विषये सत्तापक्षस्य विपक्षस्य च मध्ये तीव्रा वाक्प्रतिवाक् अभवत्। विपक्षस्य कोलाहलस्य मध्ये सदनस्य कार्यविधिः सुचारुरूपेण न चलितुं प्रभविता। वर्धमानेन कोलाहलेन अध्यक्षेण सदनस्य कार्यविधिः स्थगितुं बाध्यता अभवत्।

## सदनस्य पटलस्थले अष्ट-विधेयकानां प्रतिलिपयः स्थापिताः

विधानसभासचिवेन अष्टाणां विधेयकानां एकैकप्रतिलिपिः सभापटलस्थले स्थापिता। एतानि विधेयकानि सदनेन पारितानि भूत्वा राष्ट्रपतेः राज्यपालस्य च अनुमोदनं प्राप्तवन्ति। तेन हिमाचलप्रदेश-विनियोग-विधेयकम् २०२६, हिमाचलप्रदेश-विनियोग-विधेयकम् २०२६, हिमाचलप्रदेश-भू-जोत-अधिकतम-सीमा-संशोधन-विधेयकम् २०२४, हिमाचलप्रदेश-मूल्यवर्धितकर-संशोधन-विधेयकम् २०२६, हिमाचलप्रदेश-पञ्चायतीराज-संशोधन-विधेयकम् २०२६, शिमलायाः मार्गाणाम् उपयोगकर्तॄणां पदचारिणां च कृते लोकसुरक्षा-सुविधा-संशोधन-विधेयकम् २०२६, हिमाचलप्रदेश-लिफ्ट-संशोधन-विधेयकम् २०२६ तथा हिमाचलप्रदेश-राज्य-कृषक-आयोग-विधेयकम् २०२६ सदनस्य पटलस्थले स्थापितानि।

# मुख्यमन्त्री सुक्खू उक्तवान्—गान्धीजयन्तीतः द्विलक्षपरिवारेभ्यः १५००-१५०० रुप्यकाणि, ३०० मात्रक-निःशुल्कविद्युत्




**हिमसंस्कृतवार्ताः - शिमला।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खू उक्तवान् यत् राज्यसर्वकारः अक्टोबरमासस्य २ दिनाङ्के गान्धीजयन्त्यां 'अपना परिवार, सुखी परिवार' इति योजनां प्रारभते। अस्यां योजनायां द्विलक्षं पात्रपरिवाराणां कृते ३०० मात्रक निःशुल्कविद्युत् तथा महिलाभ्यः १५०० रुप्यकाणां आर्थिकसहायतां प्रदातुं प्रावधानं कृतम् अस्ति। सोमवासरे सायं दिल्लीभ्रमणात् प्रत्यागतः मुख्यमन्त्री विधानसभायाः सदने नियमः १३० अन्तर्गतं स्वास्थ्यसेवानां विषये सम्पन्नायां चर्चायां एतां घोषणां कृतवान्। मुख्यमन्त्रिणा उक्तं यत् सर्वकारः स्वास्थ्यविभागे ३०० चिकित्सकानां पदानि पूरयिष्यति। तदतिरिक्तं दिसम्बरमासात् मार्चमासपर्यन्तं प्रदेशस्य चिकित्सामहाविद्यालयेषु परिचारिकाणां सर्वाणि रिक्तपदानि चरणबद्धरूपेण पूरयितुं लक्ष्यं निर्धारितम् अस्ति। तेन उक्तं यत् सर्वकारः स्वास्थ्यसुविधाः सुदृढीकर्तुं तथा चिकित्सालयेषु चिकित्सकानां पेरामेडिकल-कर्मचारिणां च न्यूनतां दूरीकर्तुं निरन्तरं कार्यं कुर्वन् अस्ति। चिकित्सामहाविद्यालयेषु यन्त्राणि उपकरणानि च स्थाप्यन्ते। आईजीएमसी, चमियाना तथा टाण्डा चिकित्सामहाविद्यालयाः श्रेष्ठचिकित्सामहाविद्यालयेषु परिगण्यन्ते। अपरतः विभागीयाधिकारिभिः उक्तं यत् ३०० यूनिट् निःशुल्कविद्युत्प्रदानस्य तथा 'इन्दिरा गान्धी प्यारी बहना योजना' इत्यस्यान्तर्गतं १५००-१५०० रुप्यकाणां प्रदानस्य निर्वाचनकालीनप्रतिज्ञा एकस्मिन्नेव समये गान्धीजयन्तीतः प्रारभ्यते। ग्रामीणविकासविभागेन अस्य सम्बन्धे पात्रपरिवाराणां चयनं कृतम् अस्ति। एते उभे योजने अधुना 'अपना परिवार, सुखी परिवार' योजनायां समावेश्य सम्पूर्णप्रदेशे एकस्मिन्नेव समये प्रारप्स्येते।

## भारतीय-ऋतु-विज्ञानविभागेन छत्तीसगढ़-बिहार ओडिशा प्रान्तेषु अतिपर्जन्यस्य पूर्वानुमानं प्रकटय्य नारङ्ग-संचेतना प्रख्यापिता

भारतीय-ऋतु-विज्ञानाधिकारिभिः छत्तीसगढ़-बिहार ओडिशा प्रान्तेषु अतिपर्जन्यस्य पूर्वानुमानं प्रकटय्य नारङ्ग-वर्णीया संचेतना प्रख्यापिता। अपि च देहल्याम्, झारखण्डे, कर्णाटक-केरलयोः तटीय प्रदेशेषु च मध्यमा तीव्रा वा वृष्टिः सम्भाविता। देहली-विमानपत्तने तु मन्द-दृश्यात्मकत्वात् चतुर्दश वायु-यानानां गतिः अन्यत्र मोचिता, यात्रिभ्यश्च सूचना-सम्पर्काय उपदेशो प्रदत्तः ।



## क्रीडावार्ता

कोलम्बो-क्रिकेट-निकष-स्पर्धायाः द्वितीयदिवसे श्रीलङ्कादलं विरुध्य भारतेन स्वकीये प्रथम-पर्याये नव-क्रीडकानां हानौ त्र्यधिक पञ्चशतं धावनाङ्काः समासादिताः ।

# भाजपा द्वारा कांग्रेसनेता पवनखेड़ायाः विरुद्धं प्राथमिकी-पञ्जीकरणस्य आग्रहः

**हिमसंस्कृतवार्ताः - शिमला।**

भारतीयजनतापक्षेण कांग्रेसनेता पवनखेड़या केन्द्रीयगृहमन्त्री अमितशाहस्य विरुद्धं कथितरूपेण अपमानजनकशब्दानां प्रयोगं प्रति तीव्रः विरोधः प्रकटितः। भाजपायाः मुख्यप्रवक्ता तथा विधायकः राकेशजमवालः, विधायकः सतपालसिंहसत्ती, डी.एस. ठाकुरः तथा दिलीपठाकुरः च अतिरिक्तपुलिसाधीक्षकस्य माध्यमेन शिमलापुलिसाधीक्षकाय लिखितोपालम्भं समर्प्य पवनखेड़ायाः विरुद्धं प्राथमिकीं पञ्जीकृत्य विधि-कार्यविधिं कर्तुं आग्रहं कृतवन्तः।

भाजपायाः मुख्यप्रवक्ता राकेशजमवालः उक्तवान् यत् पवनखेड़या सार्वजनिकरूपेण केन्द्रीयगृहमन्त्री अमितशाहस्य कृते 'बौना', 'भगोड़ा', 'तड़ीपार' तथा 'औकात' इत्यादीनां शब्दानां प्रयोगः कृतः। तेन उक्तं यत् राजनैतिकमतभेदाः लोकतन्त्रस्य भागाः सन्ति, किन्तु देशस्य गृहमन्त्रिणः विरुद्धं एतादृशस्य भाषायाः प्रयोगः राजनैतिकसंवादस्य मर्यादां न्यूनयति तथा अस्य यावती निन्दा क्रियते तावती अपि न्यूनैव। तेन उक्तं यत् भाजपाप्रतिनिधिमण्डलेन पुलिसप्रशासनाय लिखितोपालम्भं दत्त्वा प्रकरणस्य अन्वेषणं तथा भारतीयन्यायसंहितायाः अन्वेषणे प्रयोज्यमानानां अन्येषां विधिप्रावधानानां च अन्तर्गतं कार्यविधिं कर्तुं आग्रहः कृतः। भाजपा सम्बन्धितं वीडियो, सामाजिकमाध्यमसामग्री तथा अन्यानि इलेक्ट्रॉनिक-साक्ष्याणि अपि पुलिसाय उपलब्धं कारयिष्यति।



राकेशजमवालः उक्तवान् यत् उपालम्भे आग्रहः कृतः अस्ति यत् पवनखेड़ायाः सम्बन्धितस्य वक्तव्यस्य मूलम् असंपादितं वीडियो/ऑडियो तथा सामाजिकमाध्यमेषु प्रकाशिताः पोस्ट-सुरक्षिताः क्रियन्ताम्, सम्पूर्णस्य वक्तव्यस्य तस्य सन्दर्भस्य च परीक्षणं क्रियताम् तथा इलेक्ट्रॉनिक-दिग्दर्शनीय-साक्ष्याणि विधिसम्मतरीत्या संरक्षितानि क्रियन्ताम्। अन्वेषणे यदि संज्ञेय-अपराधस्य आवश्यकाः तत्त्वानि प्राप्यन्ते, तर्हि प्राथमिकी पञ्जीकृत्य विध्यनुसारं कार्यविधिः क्रियताम्।

राकेशजमवालः उक्तवान् यत् सम्पूर्णः विवादः केन्द्रीयगृहमन्त्रिणा अमितशाहेन वन्देमातरम् इति विषयं प्रति दत्तस्य वक्तव्यस्य अनन्तरं सम्मुखे आगतः।

# त्रिवर्षेषु पुलिसस्य वरिष्ठाधिकारिणां विरुद्धं ३२ उपालम्भाः पञ्जीकृताः



**हिमसंस्कृतवार्ताः - शिमला।** प्रदेशपुलिसविभागे गतत्रिषु वर्षेषु (अगस्तमासस्य १ दिनाङ्कपर्यन्तम् २०२६) कनिष्ठकर्मचारिभिः अधिकारिभिः च स्वकीयानां वरिष्ठाधिकारिणां विरुद्धं कुलं ३२ उपालम्भाः पञ्जीकृताः सन्ति। विधानसभायां भरमौरस्य विधायकस्य डॉ. जनकराजस्य प्रश्नस्य लिखितोत्तरे मुख्यमन्त्रिणा एतद् आधिकारिकं विवरणं प्रस्तुतम्।

प्रतिवेदनानुसारं सर्वाधिकाः २१ उपालम्भाः शिमलाजनपदसम्बद्धाः सन्ति। तदतिरिक्तं मण्डीतः ४, चम्बा-सिरमौर-काङ्गडाभ्यः २-२ तथा पुलिसजनपद-बद्दीतः एकः उपालम्भः प्राप्तः अस्ति। एतेषु उपालम्भेषु मुख्यरूपेण उत्पीडनम्, मानसिकप्रताडना, अधिकाराणां शक्तीनां च दुरुपयोगः, अनुचितहस्तक्षेपः तथा महिला-कर्मचारिणां प्रति लैङ्गिक-उत्पीडनस्य गम्भीराः आरोपाः सम्मिलिताः सन्ति।


विवरणानुसारं कुल ३२ उपालम्भेषु ११ प्रकरणानां अन्वेषणं पूर्णं कृत्वा तेषां निवारणं कृतम् अस्ति, येषु ३ अनामिक-उपालम्भाः अपि सम्मिलिताः सन्ति। अपरतः २१ प्रकरणानाम् अन्वेषणं अद्यापि लम्बितम् अस्ति। सर्वकारेण स्पष्टं कृतं यत् येषाम् उपालम्भानाम् अद्यावधि निवारणं कृतम्, तासु प्रथमदृष्ट्या वरिष्ठाधिकारिषु अनुशासनात्मककार्यविधिः अपेक्षिता भवेत् इति समर्थयितुं किमपि तथ्यं न प्राप्तम्। तदतिरिक्तं विभागे पृथक् स्वतन्त्र-उपालम्भ-निवारणतन्त्रस्य स्थापनायाः प्रस्तावः अपि विचाराधीनः नास्ति।

## विधानसभायां पुलिस-एप् तथा करुणामूलक-नियुक्तीनां विषयः उत्थापितः

शून्यकाले पुलिसविभागस्य उपस्थिति-एप् तथा करुणामूलकाधारेण नियुक्तीनां विषयः अपि चर्चायाम् आगतः। नालागढस्य विधायकः हरदीपसिंहबाबा उक्तवान् यत् क्षेत्रे नियुक्तेषु पुलिसाधिकारिषु कर्मचारिषु च एप्-प्रयोगे व्यावहारिकाः समस्याः उत्पद्यन्ते। सीमावर्तीक्षेत्रेषु पुलिसकर्मचारिभिः सीमापारक्षेत्रेषु अपि गन्तव्यं भवति। विधानसभाध्यक्षेण अस्मिन् विषये पुलिसविभागाय प्रकरणं प्रेषयितुं आश्वासनं दत्तम्।

अपरतः नगरोटाबगवांक्षेत्रस्य विधायकः आर.एस. बालिः करुणामूलकाधारेण जीविकायाः विषयम् उत्थापितवान्। तेन उक्तं यत् आयसीमा सार्धद्विलक्षरूप्यकेभ्यः त्रिलक्षरूप्यकाणि यावत् वर्धितत्वात् पात्रजनानां संख्या प्रायः ४०० तः १२०० यावत् अभवत्। तृतीयश्रेण्यां जे.ओ.ए. इति पदेषु प्रायः १५० जनानां नियुक्तिः कृता अस्ति, किन्तु चतुर्थश्रेण्याः प्रक्रिया अद्यापि प्रारब्धा नास्ति। तेन तां शीघ्रं प्रारभितुं आग्रहः कृतः। उपमुख्यमन्त्री मुकेश अग्निहोत्री उक्तवान् यत् सर्वकारः अस्मिन् विषये विचारं कुर्वन् अस्ति तथा निर्णयस्य अनन्तरं सदनं सूचयिष्यते।

# चन्द्रबदनीपरिसरे आयोजिता भारतीयज्ञान-परम्पराविषये एकदिवसीया राष्ट्रियसङ्गोष्ठी



श्रीदेवसुमनोत्तराखण्डविश्वविद्यालयस्य चन्द्रबदनी-परिसरे परिसरनिदेशकस्य डा. महन्तमौर्यस्य अध्यक्षतायां शिक्षामन्त्रालयस्य भारतसर्वकारस्य "अखिलभारतीयशिक्षासमागम–२०२६" इत्यन्तर्गतं "भारतीयज्ञानपरम्परा (भारतीयभाषाणां परिप्रेक्ष्ये)" इत्यस्मिन् विषये एकदिवसीया राष्ट्रियसङ्गोष्ठी समायोजिता। अस्याः सङ्गोष्ठ्याः प्रमुखोद्देश्यं भारतीयज्ञानपरम्परायाः, भारतीयभाषाणां समृद्धसांस्कृतिकपरम्परायाः संरक्षणं संवर्धनञ्च आसीत्। कार्यक्रमस्य शुभारम्भः दीपप्रज्वलनेन सरस्वतीवन्दनया च अभवत्। ततः कार्यक्रमसंयोजकेन संस्कृतविभागस्य सहायकाचार्येण डा. मूलचन्द्रशुक्लेन सङ्गोष्ठ्याः रूपरेखा विषयस्य समसामयिकप्रासङ्गिकता च प्रतिपादिता। परिसरप्राचार्येण अतिथीनां स्वागतं कृत्वा भारतीयज्ञानपरम्परायाः महत्त्वं आधुनिकशिक्षा-व्यवस्थायां तस्याः उपयोगिता च विवृता।

मुख्यवक्त्रा प्रो. रामबहादुरशुक्लेन, जम्मूविश्वविद्यालयस्य संस्कृतविभागाध्यक्षेन, भारतीयज्ञानपरम्परायाः विविधाः आयामाः विस्तरेण निरूपिताः। तेन भारतीयभाषासु निहितायाः ज्ञानसम्पदः संरक्षणम्, अनुसन्धानं नूतनसन्ततये हस्तान्तरणञ्च अत्यावश्यकमिति प्रतिपादितम्। आधुनिकशिक्षायाः समकालीनसमाजस्य च सहैव भारतीयज्ञानपरम्परायाः समन्वयस्य आवश्यकतापि प्रतिपादिता। सहसचिवया राजनीतिशास्त्रविभागस्य सहायकाचार्यया सुश्री वन्दनया भारतीयज्ञान-परम्परायाः भारतीयभाषाणां च संरक्षणं वर्तमानसन्ततये अत्यन्तमावश्यकमिति उक्त्वा तयोः व्यापकप्रचारप्रसारस्य आवश्यकता उद्घोषिता।

सङ्गोष्ठ्यां विश्वविद्यालयस्य परिसरस्य च शिक्षकाः, शोधार्थिनः, विद्यार्थिनश्च उत्साहपूर्वकं सहभागीभूताः अभवन्। तकनीकीसत्रेषु भारतीयभाषासु निहितं ज्ञानविज्ञानं, साहित्यं, संस्कृतिः, लोकपरम्पराः, शिक्षापद्धतयः तथा समकालीनसन्दर्भेषु भारतीयज्ञानपरम्परा इत्यादिषु विषयेषु शोधपत्राणि प्रस्तुतानि। अन्ते भूगोलविभागस्य सहायकाचार्येण डा. गुरुप्रसादथपलियालेन धन्यवादज्ञापनं कृतम्। तेन समस्तेभ्यः अतिथिभ्यः, वक्तृभ्यः, शोधपत्रप्रस्तुतकर्तृभ्यः, आयोजकेभ्यः, शिक्षकेभ्यः तथा प्रतिभागिभ्यः हार्दिकमाभारं प्रकटितम्। एषा राष्ट्रियसङ्गोष्ठी भारतीयज्ञानपरम्परायाः भारतीयभाषाणां च प्रति जनजागरणवर्धनाय तथा तासां समकालीनशैक्षिकपरिप्रेक्ष्ये सुदृढ-समन्वयाय महत्त्वपूर्णरूपेण सिद्धाभूत्।

# कुमारभास्करवर्म- संस्कृत- पुरातनाध्ययन- विश्वविद्यालये २०२६ वर्षस्य दीक्षारम्भकार्यक्रमः भव्यरूपेण सम्पन्नः



**हिमसंस्कृतवार्ताः- डॉ. निशिकान्तपाण्डेयः, नलबारी असमः।**

कुमारभास्करवर्म- संस्कृत- पुरातनाध्ययन- विश्वविद्यालये २०२६ वर्षस्य 'दीक्षारम्भः' इति कार्यक्रमः आयोजितः अभवत्। अस्मिन् सभायां मुख्यातिथिरूपेण असमसर्वकारस्य वित्तमन्त्री तथा स्थानीयविधायकः जयन्तमल्ल बरुवावर्येण सह बङ्गाईगाव- विश्वविद्यालयस्य सम्माननीयकुलपतिः विशिष्टशिक्षाविद् प्राध्यापकः तारिणीचन्द्रडेकावर्यः उपस्थितः आसीत्। विश्वविद्यालयस्य कुलपतिः प्राध्यापकः प्रह्लाद रा जोशीवर्यः, उपकुलपतिः प्राध्यापिका मल्लिका कलिता, कुलसचिवः डॉ. मनोजकुमारशर्मा एवञ्च विभिन्नाः प्राध्यापकाः प्राध्यापिकाः शोधछात्राः च उपस्थिताः आसन्। सहायकाचार्यायाः लोपामुद्रागोस्वामिवर्यायाः सञ्चालने आयोजिते अस्मिन् कार्यक्रमे कुलपतेः जोशीवर्यस्य पक्षतः सर्वेषां नवच्छात्राणाम् औपचारिकरूपेण विश्वविद्यालये स्वागतं कृतं प्राध्यापकः डेकावर्यः नवच्छात्रेभ्यः दीक्षोपदेशं प्रदत्तवान्। स्नातकप्रथमषण्मासस्य २४७ छात्राः, स्नातकोत्तर- प्रथमषण्मासस्य ३६६ छात्राः दीक्षोपदेशं गृहीतवन्तः। अस्य कार्यक्रमस्य साकमेव ज्येष्ठछात्रैः नवच्छात्रेभ्यः सङ्कल्पवचनं कारितम्। अस्यामेव सभायां मुख्यातिथिः वित्तमन्त्री जयन्त मल्ल बरुवावर्यः छात्रान् उद्दिश्य दत्ते भाषणे संस्कृतशिक्षा कथं छात्रान् विनयीकरोति समाजं प्रति उत्तरदायिनं च करोति इति प्रदर्शितवान्। मुख्यतः सङ्कल्पवचनम् आधारीकृत्य भाषिते स्ववक्तव्ये सः संस्कृतविश्वविद्यालयस्य सम्भावनाः प्रति स्वमतं प्रकटितवान्। २०११ तमे वर्षे स्थापितस्य अस्य विश्वविद्यालयस्य वर्तमानेषु १४ विभागेषु सर्वसमुच्चयेन १७२५ छात्राः अध्ययनं कुर्वन्तः सन्ति इति विषयः नलबारीक्षेत्रस्य कृते तथा च समग्र-उच्चशिक्षाक्षेत्रस्य कृते अतीव आशाजनकः इति सः उल्लिखितवान्। विशिष्टातिथिः प्राध्यापकः डेकावर्यः संस्कृतशिक्षायाः महत्त्वं भविष्यस्य सम्भावनाः च इति अधिकृत्य स्वस्य सारगर्भितं भाषणं प्रदत्तवान्। उल्लेखनीयं यत् अद्यतनसभायामेव विश्वविद्यालयस्य वार्षिकपत्रिकायाः 'भास्करद्युति' इत्यस्याः विमोचनं कृतम्, तथा च विश्वविद्यालयस्य अनलाइन- ISSN- शोधपत्रिकायाः 'ई- आन्तरिका' इत्यस्याः शुभविमोचनं जातम्। सभायाः अन्ते सर्वान् प्रति धन्यवादज्ञापनं विश्वविद्यालयस्य कुलसचिवः डॉ. मनोज कुमार शर्मावर्यः अकरोत्।

# लखनऊनगरे संस्कृतसाहित्येण सह निःशुल्कस्य सिविलसेवाप्रशिक्षणस्य अवसरः




**हिमसंस्कृतवार्ताः- लखनऊ, उत्तरप्रदेशः,**

उत्तरप्रदेश- संस्कृत- संस्थानम्, लखनऊद्वारा संस्कृतसाहित्यस्य अध्ययनं कुर्वद्भ्यः अभ्यर्थिभ्यः सिविलसेवापरीक्षायाः सज्जतायै निःशुल्क- प्रशिक्षणस्य अवसरः प्रदीयते। संस्थानेन वर्ष २०२६-२७ सत्रस्य IAS-प्रशिक्षणकार्यक्रमस्य कृते निःशुल्कपञ्जीकरणस्य प्रक्रिया प्रारब्धा अस्ति। संस्थानेन प्रकाशितसूचनानुसारं निःशुल्कपञ्जीकरणं २२ अगस्ततः १५ सितम्बर २०२६ पर्यन्तं कर्तुं शक्यते। प्रशिक्षणसत्रस्य प्रारम्भः नवम्बर- मासे २०२६ भविष्यति। संस्कृतसाहित्येन सह सामान्याध्ययनस्य अध्ययनं कर्तुम् इच्छन्तः योग्याः अभ्यर्थिनः अस्य प्रशिक्षणकार्यक्रमस्य लाभं प्राप्तुं शक्नुवन्ति। प्रशिक्षणाय आवेदनस्य अन्तिमतिथिपर्यन्तं विधिना मान्यताप्राप्तविश्वविद्यालयस्य स्नातकपदवी अथवा तत्समकक्षयोग्यता आवश्यकतारूपेण निर्दिष्टा अस्ति। अभ्यर्थिनां आयुः २१ तः ३५ वर्षपर्यन्तम् अपेक्षिता अस्ति। प्रशिक्षणार्थिनां चयनं प्रवेशपरीक्षायाः साक्षात्कारस्य च आधारेण भविष्यति। प्रवेशपरीक्षायां सामान्याध्ययनं तथा संस्कृतसामान्यव्याकरणं विषयत्वेन निर्धारितम् अस्ति। प्रवेशपरीक्षा लखनऊ- नगरे आयोजिता भविष्यति। प्रशिक्षणकार्यक्रमस्य अन्तर्गतं सामान्याध्ययनस्य संस्कृतसाहित्यस्य च विषयेषु अनुभवीविशेषज्ञैः शिक्षणं प्रदास्यते। ऑनलाइन- ऑफलाइन- माध्यमेन, वीडियो- व्याख्यानानां च माध्यमेन अपि अध्ययनस्य सुविधा उपलब्धा भविष्यति। अभ्यर्थिभ्यः द्विभाषिकपाठ्यसामग्री तथा अध्ययनसंसाधनानि प्रदास्यन्ते।

उत्तरप्रदेश- संस्कृतसंस्थानस्य एषा योजना संस्कृतपृष्ठभूमिं धारयद्भ्यः युवभ्यः सिविलसेवाक्षेत्रे प्रवेशाय महत्त्वपूर्णं अवसरं प्रददाति। संस्थानस्य सूचनानुसारं पूर्वसत्रेषु अस्य योजनायाः अन्तर्गतं सिविलसेवासहितासु अन्यासु परीक्षासु ७८ तः अधिकाः छात्राः अन्तिमरूपेण चयनिताः अभवन्।

इच्छुकाः अभ्यर्थिनः उत्तरप्रदेशसंस्कृतसंस्थानस्य आधिकारिकजालपुटे अथवा संस्थानेन निर्दिष्टे सिविलसेवाप्रशिक्षणस्य पञ्जीकरणजालपुटे आवेदनं कर्तुं शक्नुवन्ति। संस्थानेन संस्कृतसाहित्यं पठित्वा सिविलसेवाक्षेत्रे भविष्यं निर्मातुम् इच्छद्भ्यः अभ्यर्थिभ्यः अस्य अवसरस्य लाभं ग्रहीतुं आह्वानं कृतम्।



# मिथ्यावार्ता लोकतन्त्राय हानिप्रदा?

अद्यतनस्य डिजिटलयुगस्य सर्वाधिक् गम्भीरसमस्या मिथ्यावार्तायाः तीव्रः प्रसारः अस्ति। पूर्वं वार्ताः वर्तमानपत्रैः दूरदर्शनेन वा प्रसारिताः भवन्ति स्म; अधुना तु सामाजिकमाध्यमानां माध्यमेन एका असत्यवार्ता क्षणमात्रेण सहस्रेषु, लक्षेषु च जनानां समीपं गन्तुं शक्नोति। अतः प्रश्नः केवलम् "किं वार्ता मिथ्या अस्ति?" इति न, अपि तु "मिथ्यावार्ता लोकतन्त्राय कियती हानिप्रदा?" इति अपि अस्ति।

भारतसम्बन्धिनः Reuters Institute इत्यस्य Digital News Report अनुसारं 57% उत्तरदातारः अन्तर्जाले दृश्यमानाः वार्ताः सत्याः वा मिथ्याः इति विषये चिन्तिताः आसन्। 51% जनाः पक्षपातपूर्णसामग्रीं, 51% जनाः निकृष्टपत्रकारितां (Loose Journalism), 50% जनाः मिथ्यासमाचारान् महत्त्वपूर्णचिन्तारूपेण निर्दिष्टवन्तः।

लोकतन्त्रस्य आधारः जागरुकः नागरिकः अस्ति। नागरिकः यदि सत्याधारितसूचनां प्राप्नोति, तर्हि सः विषयान् सम्यक् अवगत्य निर्णयं कर्तुं शक्नोति। परन्तु मिथ्यावार्ताः जनमतं भ्रामयितुं, सामाजिकविभाजनं वर्धयितुं, राजकीयविषयेषु अविश्वासं जनयितुं च शक्नुवन्ति। विशेषतः निर्वाचनकाले असत्यसूचनायाः प्रभावः अधिकः भवितुम् अर्हति, यतः तदा नागरिकाः शीघ्रं निर्णयं कुर्वन्ति। 2024 तमे वर्षे भारतस्य निर्वाचनसम्बद्धे विश्लेषणे अपि मिथ्यासूचना निर्वाचनप्रक्रियायाः अखण्डतां जनविश्वासं च प्रभावयितुं शक्नोतीति चिन्तितम्।

अद्य कृत्रिमबुद्धेः विकासेन समस्या अधिका जटिला अभवत्। कृत्रिमबुद्धेः साहाय्येन निर्मिताः मिथ्याचित्राणि, परिवर्तिताः ध्वनिमुद्राः, तथाकथितानि "डीपफेक" दृश्यानि च वास्तविकवत् दृश्यन्ते। भारतस्य विशालस्य अन्तर्जाल- उपयोक्तृसमुदायस्य कारणेन एतादृशसामग्री शीघ्रं बहुषु जनसमूहेषु प्रसर्तुं शक्नोति। किन्तु समाधानं केवलं सर्वासां शङ्कास्पदवार्तानां निषेधः न भवेत्। लोकतन्त्रे अभिव्यक्तिस्वातन्त्र्यं तथा सत्यसूचनायाः अधिकारः उभौ महत्त्वपूर्णौ स्तः। यदि "मिथ्या" इति निर्णयस्य अधिकारः केवलम् एकस्य संस्थायाः हस्ते भवति, तर्हि अस्य अधिकारस्य दुरुपयोगस्य सम्भावना अपि भवति। अतः तथ्यपरीक्षणस्य प्रक्रिया पारदर्शिनी, स्वतन्त्रा, उत्तरदायिनी च भवेत्।

समस्या केवलं सामाजिकमाध्यमानां नास्ति; नागरिकस्य अपि उत्तरदायित्वम् अस्ति। कस्यापि 'सनसनीखेज' वार्तायाः अग्रे प्रेषणात् पूर्वं तस्याः स्रोतः, तिथिः, प्रमाणानि च परीक्षितव्यानि। "मम मतस्य अनुकूलम् अस्ति" इति कारणेन एव वार्ता सत्येति न स्वीकरणीया। लोकतन्त्रे विवेकः प्रत्येकस्य नागरिकस्य प्रथमं रक्षणकवचम् अस्ति।

अतः मिथ्यावार्ताः केवलं पत्रकारितायाः समस्या नास्ति; ताः लोकतन्त्रस्य विश्वासस्य समस्याः तु सन्ति। स्वतन्त्रं माध्यमम्, उत्तरदायी सामाजिक- माध्यमम्, प्रभावी तथ्यपरीक्षणं, डिजिटल- साक्षरता, विवेकशीलाः नागरिकाः एतेषां समन्वयेन एव अस्य संकटस्य प्रत्यक्षीकरणं कर्तुं शक्यते। सत्यस्य संरक्षणं केवलं पत्रकारस्य कर्तव्यं न, अपि तु लोकतन्त्रस्य प्रत्येकस्य नागरिकस्य दायित्वम् अस्ति।

**-देवेशविद्यार्थी संस्कृतभाषी',**

# हरियाणा-केन्द्रीय-विश्वविद्यालये वैदिकयज्ञस्य 'गुरुकुलशिक्षायाः पुरोधा स्वामी श्रद्धानन्दः' इति विषयकस्य राष्ट्रियसंगोष्ठ्याः आयोजनम्





## हरियाणा-केन्द्रीय-विश्वविद्यालये वैदिकयज्ञस्य 'गुरुकुलशिक्षायाः पुरोधा स्वामी श्रद्धानन्दः' इति विषयकस्य राष्ट्रियसंगोष्ठ्याः आयोजनम्

**महेन्द्रगढः, २४ अगस्त २०२६ हिमसंस्कतवार्ता।**

हरियाणा-केन्द्रीय-विश्वविद्यालये स्थितेन स्वामी-दयानन्द-सरस्वती-पीठेन नवागन्तुक-विद्यार्थिनां विद्याभ्यासारम्भस्य पावनावसरे वैदिकयज्ञः, वृक्षारोपणकार्यक्रमः, 'गुरुकुलशिक्षायाः पुरोधा स्वामी श्रद्धानन्दः' इति विषयमधिकृत्य एकदिवसीया राष्ट्रियसंगोष्ठी च भव्यरूपेण आयोजिता।

अस्य कार्यक्रमस्य मुख्योद्देश्यं नवप्रविष्टान् विद्यार्थिनः भारतीयज्ञानपरम्परया, वैदिकसंस्कृत्या, संस्कारैः, जीवनमूल्यैः राष्ट्रनिर्माणभावनया च सम्बद्धान् कर्तुम् आसीत्। कार्यक्रमस्य शुभारम्भः वैदिकयज्ञेन अभवत्। विद्वद्भिराचार्यैः वैदिकमन्त्राणां सस्वरपाठेन नवागन्तुकविद्यार्थिनां उज्ज्वलभविष्याय, उत्तमचरित्रनिर्माणाय, विश्वविद्यालयस्य उन्नत्यै च मंगलकामनाभिः यज्ञे आहुतयः प्रदत्ताः। विश्वविद्यालयस्य माननीयः कुलपतिः प्रो. टंकेश्वरकुमारः तथा प्रो. सुनीता श्रीवास्तवा यज्ञमानरूपेण उपस्थितौ आस्ताम्। ताभ्यां विद्यार्थिभ्यः भारतीयसंस्कृतेः, संस्काराणां तथा जीवनमूल्यानां प्रति प्रतिबद्धतायाः सन्देशः प्रदत्तः।

यज्ञानन्तरं पर्यावरणसंरक्षणस्य, प्रकृतिं प्रति उत्तरदायित्वस्य च सन्देशं प्रसारयितुं वृक्षारोपणकार्यक्रमः अपि सम्पन्नः। ततः सभागारे 'गुरुकुलशिक्षायाः पुरोधा स्वामी श्रद्धानन्दः' इति विषयमवलम्ब्य राष्ट्रियसंगोष्ठी आयोजिता।a

उद्घाटनसत्रस्य अध्यक्षतां कुर्वन् विश्वविद्यालयस्य माननीयः कुलपतिः प्रो. टंकेश्वरकुमारः अवदत् यत् स्वामी श्रद्धानन्दस्य जीवनं त्यागस्य, तपस्यायाः, शिक्षायाः, राष्ट्रभक्तेः तथा चरित्रनिर्माणस्य प्रेरणादायकमादर्शम् अस्ति। तेषां जीवनकार्येभ्यः प्रेरणां गृहीत्वा विद्यार्थिभिः स्वजीवनं श्रेष्ठं कर्तुं प्रयत्नः करणीयः। चरित्रवन्तः, संस्कारसम्पन्नाः राष्ट्रभक्ताश्च युवान एव सशक्तराष्ट्रस्य आधारशिला भवन्ति इति सः विद्यार्थिनः प्रेरितवान्। कार्यक्रमस्य संयोजिका तथा स्वामी-दयानन्द-सरस्वती-पीठस्य अध्यक्षा डा. सुमनराणी पीठस्य गतिविधीनां उद्देश्यानां च परिचयं प्रदाय अवदत् यत् पीठं भारतीयज्ञानपरम्परायाः, वैदिकसंस्कृतेः तथा राष्ट्रनिर्माणमूल्यानां विद्यार्थिषु प्रसारणाय निरन्तरं प्रयतते। अस्य आयोजनस्य मूलसंकल्पः "आगच्छन्तु, गुरुकुलपरम्परया राष्ट्रनिर्माणस्य प्रेरणां गृह्णीमः" इति भावनां साकारयितुम् अस्ति। स्वामी श्रद्धानन्दस्य जीवनसंघर्षः, शिक्षायै समर्पणभावः, राष्ट्रभक्तिश्च अद्यतनयुवपीढ्यै अनुकरणीयाः सन्ति इति तया प्रतिपादितम्। राष्ट्रियसंगोष्ठ्याः मुख्यवक्ता जवाहरलाल-नेहरू-विश्वविद्यालयस्य, नवदेहल्याः डॉ. विजेन्द्रसिंहः स्वामी श्रद्धानन्देन गुरुकुल-काङ्गडी-संस्थायाः स्थापनया भारतीयशिक्षापद्धतेः वैज्ञानिकतां प्रासङ्गिकतां च प्रतिपादितवान्। भारतीयज्ञानपरम्परायां आधुनिकविज्ञानस्य समकालीनशिक्षायाश्च विकासाय विपुलाः सम्भावनाः सन्ति इति सः अवदत्। राष्ट्रियशिक्षानीतिः-२०२० स्वामी श्रद्धानन्दस्य शिक्षादर्शनस्य दूरदर्शिनः स्वप्नस्य च दिशि महत्त्वपूर्णं पदमिति तेन प्रतिपादितम्।

विशिष्टातिथिः राष्ट्रपतिपुरस्कारेण सम्मानितः डा. आर. एन. यादवः स्वामी श्रद्धानन्दस्य अद्वितीयबलिदानं, शिक्षाजागरणे योगदानं तथा राष्ट्रनिर्माणे तस्य महत्त्वपूर्णां भूमिकां स्मृत्वा अवदत् यत् तस्य सम्पूर्णं जीवनं समाजस्य राष्ट्रस्य च सेवायै समर्पितमासीत्। तस्य विचाराः अद्यापि युवपीढीं राष्ट्रसेवायै प्रेरयन्ति।

प्रो. पायलचन्देलः अवदत् यत् वैदिकयज्ञस्य राष्ट्रियसंगोष्ठ्या सहायोजनम् विद्यार्थिभ्यः विद्यया सह विनयस्य, संस्कारस्य तथा जीवनमूल्यानां शिक्षां ददाति। शिक्षायाः वास्तविकमुद्देश्यं न केवलं ज्ञानार्जनम् अपितु श्रेष्ठव्यक्तित्वस्य निर्माणमपि अस्ति। कार्यक्रमे मनोविज्ञानविभागस्य विभागाध्यक्षा प्रो. विश्वा चौधरी अतिथिपरिचयं प्रदत्तवती । कार्यक्रमस्य सुव्यवस्थितं सुललितञ्च सञ्चालनं विश्वविद्यालयस्य छात्राभ्यां चेतनशर्मणा कुमकुमेन च हिन्दी-संस्कृतयोः माध्यमेन कृतम्। कार्यक्रमस्य अन्ते संयोजिका डा. सुमनराण्या सर्वेषाम् अतिथीनां, विदुषां, शिक्षकाणां, शोधार्थिनां, विद्यार्थिनां तथा सहयोगिनां प्रति हार्दिकं कृतज्ञताज्ञापनं कृतम्। अस्मिन् अवसरे महेन्द्रगढ-नारनौलक्षेत्रयोः आर्यसमाजस्य अनेके गणमान्याः जनाः, समाजसेविनः, विश्वविद्यालयस्य विविधविभागानां शिक्षकाः, छात्राः, शोधार्थिनश्च विशेषरूपेण उपस्थिताः आसन्। सम्पूर्णकार्यक्रमस्य वातावरणं वैदिकसंस्कृत्या, शिक्षया, संस्कारैः, राष्ट्रभक्त्या स्वामी श्रद्धानन्दस्य प्रेरणादायकजीवनसन्देशेन च ओतप्रोतम् आसीत्। कार्यक्रमेन नवागन्तुकविद्यार्थिभ्यः सशक्तः सन्देशः प्रदत्तः यत् आधुनिकशिक्षया सह भारतीयज्ञानपरम्परायाः, संस्काराणां राष्ट्रधर्मस्य च समन्वय एव सर्वांगीण विकासस्य श्रेष्ठव्यक्तित्वस्य निर्माणस्य च सुदृढः आधारः अस्ति।

# ॥श्री जयन्ती दुर्गा मङ्गलाष्टकम्।।

कुलदेवि जगन्मातः! वंशरक्षिणि सर्वदा।
कुलवृद्धिप्रदे देवि, सर्वमङ्गलकारिणी॥१॥
भक्ताभीष्टप्रदे मातः, सौभाग्यसम्पदां निधिः।
कुलेश्वरि नमस्तुभ्यं त्राहि मां कुलनायिके॥२॥
जयन्ती पाहि विश्वं हि विश्वमातः दयानिधिः।
भक्तवत्सलरूपेण, पालयस्व कुलं मम॥३॥
शत्रुभीतिविनाशिन्यै, नमस्तेऽस्तु कुलेश्वरि।
भो जगदम्बिके देहि आयुरारोग्यसम्पदाम्॥४।।
विद्यां बुद्धिं बलं देहि श्रद्धां धैर्यं यशस्तथा।
परहितरतो नित्यं सन्मार्गे मे पदं भवेत्॥५॥
त्वत्पादाम्बुजसेवायां, नित्यं भक्तिर्दृढा मम।
जन्मजन्मान्तरे देवि, भव मे परमाश्रया॥६॥
शुभप्रदा जगन्मातः सर्वसिद्धिप्रदायिनी।
प्रसन्ना भव मे नित्यं, रक्ष रक्ष नमोऽस्तु ते॥७॥
त्वदीयकृपया देवि, वर्धते मे कुलं सदा।
शान्तिः विश्वेऽस्तु हे देवि श्रेयः पुंसां भवेत् सदा॥८॥
इति विद्यावारिधि रमेशचन्द्रशर्मप्रणीतं श्रीजयन्तीदुर्गामङ्गलाष्टकं सम्पूर्णम्।

**डॉ.रमेशचन्द शर्मा शिमला**



# केन्द्रीय- संस्कृत- विश्वविद्यालये आध्यात्मिक- सांस्कृतिककार्यक्रमैः सह महाराजा- रणवीरसिंह- जयन्तीसमारोहः




**हिमसंस्कृतवार्ताः- प्रवेशकुमारशुक्लः, जम्मू**

केन्द्रीयसंस्कृतविश्वविद्यालये 23- 24 अगस्त इत्येतयोः दिवसेषु विविधाः आध्यात्मिकाः, सांस्कृतिकाः, शैक्षिकाश्च कार्यक्रमाः उत्साहपूर्णे वातावरणे आयोजिताः। एतेषां कार्यक्रमाणां माध्यमेन छात्रेषु छात्रासु च भारतीयसंस्कृतेः, संस्कृतभाषायाः, भारतीयज्ञानपरम्परायाश्च प्रति अनुरागः जागरूकता च प्रोत्साहिता। त्रयोविंशति दिनाङ्के पुरुषछात्रावासे छात्रैः श्रीमद्भगवद्गीतायाः पारायणं कृतम्। एतत् पारायणकार्यक्रमं पुरुषछात्रावासस्य सह- अधिष्ठाता डॉ. प्रदीपकुमारमिश्रः, डॉ. अखिलेशकुमारत्रिपाठि इत्येताभ्यां मार्गदर्शनाभ्यां सम्पन्नम्। सहैव महिला एवं पुरुष छात्रावासयोः रामरक्षास्तोत्रस्य एवं गजेंद्रमोक्षस्य च पारायणं कृतम्, यस्मिन् छात्रावासे निवसद्भिः सर्वैः छात्रैः छात्राभिश्च उत्साहपूर्वकं भागः गृहीतः। महिलाछात्रावासस्य अधिष्ठात्री डॉ. स्नेहलतामहोदयापि कार्यक्रमे उपस्थिताः आसन्।

24 अगस्त पूर्वाह्ने एकादशवादने केंद्रीय- संस्कृत- विश्वविद्यालये श्रीमहाराजारणवीरसिंह जयंतीकार्यक्रमः आयोजितः। कार्यक्रमस्य प्रारम्भः महाराजारणवीरसिंहस्य प्रतिमायाः माल्यार्पणेन अभवत्। कार्यक्रमे राजपूत-युवा-सभायाः राजनसिंहवर्यः हैपी, सरपंच कोट भलवाल राजदेवसिंहवर्यः जाम्बवाल, पूर्व सरपंच चुन्नीलालमहोदयाः उपस्थिताः आसन्। कार्यक्रमस्याध्यक्षतां परिसरनिदेशकाः प्रो. सतीशकुमारकपूरवर्याः अकुर्वन्। संचालनं योगप्राध्यापक डॉ. मणिकांततिवारी अकरोत्। स्वागतभाषणं शिक्षाविभागस्य प्राध्यापकः प्रो. ऋषिराजः अकरोत्। धन्यवादज्ञापनं डोगरीभाषायाः प्राध्यापकः कमलकिशोरमहोदयः अकरोत्। कार्यक्रमे सर्वे परिसरीयाः प्राध्यापकाः, छात्राः, कर्मचारी, अन्ये सदस्याश्च सम्मिलिताः अभवन्। कार्यक्रमस्य समापनं राष्ट्रगानेन अभवत्। सम्पूर्णसंस्कृतसप्ताहकार्यक्रमस्य संयोजकः व्याकरणविद्याशाखायाः आचार्य डॉ प्रमोदकुमारशुक्लः अपि उपस्थितः आसीत्। अपराह्न 02 वादनतः वाणीविलास सभागारे संस्कृतगीतगानस्पर्धा, मम्मटसभागारे शास्त्रीयस्पर्धा आयोजितः, यस्मिन् अधिकाधिकाः विद्यार्थिनः उत्साहपूर्वकं प्रतिभागं कृतवन्तः। संस्कृतसप्ताहः संस्कृतभाषायाः अध्ययनस्य, अध्यापनस्य, प्रचार-प्रसारदृष्ट्या महत्त्वपूर्णः अवसरः अस्ति। अनेन माध्यमेन भारतीय- ज्ञान- परम्परायाः, संस्कृतेः संरक्षणं संवर्धनं च भवति। एतादृशैः कार्यक्रमैः विद्यार्थिनः संस्कृतस्य विविधैः आयामैः परिचिताः भवन्ति तथा स्वप्रतिभां प्रस्तोतुं अवसरं प्राप्नुवन्ति। संस्कृतगीतगान एवं शास्त्रीय स्पर्धादीनां माध्यमेन विद्यार्थिषु संस्कृतभाषायाः प्रति रुचिः, आत्मविश्वासः, सृजनात्मकाभिव्यक्तिश्च वर्धते।

एवं दिनद्वये आयोजितेषु आध्यात्मिकेषु, सांस्कृतिकेषु, शैक्षिकेषु च कार्यक्रमेषु छात्रैः छात्राभिश्च, प्राध्यापकैः, कर्मचारिभिः, अन्यैः सदस्यैश्च उत्साहपूर्वकं सहभागिता कृता।

# "केन्द्रं प्रदेशराज्येभ्यः एलपीजी-ऊर्जातः पीएनजी-ऊर्जा पर्यन्तं पारगमनं कर्तुं आग्रहं करोति। "




**हिमसंस्कृतवार्ताः- रविः खरिडेहालः, बेङ्गलूरु।**

केन्द्र- ईन्धन- तैलमन्त्रालयेन राज्येभ्यः केन्द्रप्रदेशेभ्यः च आग्रहः कृतः यत् ते अनिलकोष- आपूर्तितः अनिलनलिका-आपूर्तिं प्रति पारगमनस्य शीघ्रतां कुर्वन्तु। मन्त्रालयेन प्रकाशितं यत् पीएनजी-आपूर्तिः सुरक्षिता, स्वच्छा, अधिका कार्यक्षमता च अस्ति। राज्येभ्यः, केन्द्रशासितक्षेत्रेभ्यः च जिलास्तरीयप्रशासनं प्रति यत् समर्थनं भवति तत् प्रक्रियायाः त्वरिततां सक्षमं करिष्यति। पीएनजी प्रति संक्रमणे एलपीजी वितरणस्य सङ्क्रामणभारं न्यूनीकरोति, उपभोक्तृसुस्थतां च उत्तमं करोति। स्थानीय- अनिलकोष- वितरणकेन्द्रस्य आधारभूत- संरचनायाः शोधनं करोति। प्रशासनस्य क्षेत्रात् बहिः कारकानां कारणेन अद्यतनविघटनानाम् अनन्तरं एषा योजना प्रोज्झिता। यथा होर्मूजमार्गात् आयातेभ्यः भयत्वपूर्णमार्गं अस्ति। एतस्य पार्श्वगमनाय भारतस्य एतादृशीनां योजनानाम् आवश्यकता वर्तते।

# लघ्वी कावडयात्रा- मम प्रथमः अनुभवः







भगवत् शिवस्य भगवत्याः पार्वत्याश्च प्रेरणया अस्य श्रावणमासस्य ममापि एका लघ्वी कावडयात्रा सम्पन्ना अभवत्। अस्याः यात्रायाः अनुभवेन अहं अत्यन्तम् आनन्दितास्मि। द्वाविंशतितमे दिने सर्वप्रथमं गढ़मुक्तेश्वरं गत्वा तत्र गङ्गाजलं संगृहीतं कृतवती। गङ्गाजलं संगृह्य ततः परदिने, अर्थात् त्रयोविंशतितमे दिने, अहं शुक्रतीर्थं हस्तिनापुरं च गत्वा दर्शनस्य लाभं प्राप्तवती। हस्तिनापुरे पाण्डेश्वरमहादेवस्य प्राचीनं मन्दिरम् अस्ति। प्राचीनकथायाः अनुसारं पाण्डवाः स्वशासनकाले हस्तिनापुरे अस्य शिवलिङ्गस्य स्थापना कृतवन्तः। शुक्रतीर्थः अपि पवित्रं स्थनाम् अस्ति। यत्र श्रीशुकदेवमुनिः राज्ञपरीक्षिताय/ राज्ञपरीक्षितस्य कृते/ राज्ञपरीक्षितार्थं सप्तदिनेषु श्रीमद्भागवतस्य कथां श्रावितवान् इति प्रसिद्धम् अस्ति। उभयस्थाने अपि अहं गङ्गाजलेन भगवत् शिवं अभिषिक्तवती। तदनन्तरं, चतुर्विंशतितमे दिने, अर्थात् २०२६-वर्षस्य श्रावणमासस्य अन्तिमे सोमवासरे, चाँदनीचौकस्थानस्य समीपे स्थिते प्रसिद्धे गौरीशङ्करमन्दिरे गङ्गाजलं समर्प्य मम कावडयात्रां पूर्णं कृतवती। श्रावणमासे एषः मम प्रथमः अनुभवः आसीत्। सम्पूर्णायाः यात्रायाः अनुभवेन मम हृदयं भक्त्या, शान्त्या आनन्देन च परिपूर्णम् अभवत्।

# वार्ता-संवादः

**नन्दिनी-:** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये! अद्य काश्चन विचित्राः वार्ताः मया श्रुताः। चीने 'नियु-लै' नाम्ना असुन्दरेण सजीवितचित्रेण अन्तर्जाले महती प्रसिद्धिः लब्धा। तस्य विकृतैः चलनवलनैः जनानां कौतुकम् उत्पादितम्।

**काव्या-:** सत्यम्! तत् चित्रं दृष्ट्वा मयापि बहु हसितम्। परन्तु अपरा विचित्रा वार्ता श्रूयताम्। सर्वोच्चन्यायालयेन पञ्चाधिकशतवर्षीयस्य वृद्धस्य अपराधिनः अवशिष्टः कारावासदण्डः क्षमितः तस्मै अन्तिमा मुक्तिः च दत्ता। अतिवृद्धत्वात् सः कारुण्यात् मुक्तः कृतः।

**नन्दिनी-:** अहो! शतवर्षं यावत् कारावासे स्थित्वा एतादृशी मुक्तिः प्राप्ता इति महदाश्चर्यम्! अपि च क्रीडाजगति 'फीफा' संस्थायाः अध्यक्षेण त्यागपत्रस्य प्रश्ने पृष्टे सति एकः केशहीनः वार्ताहरः उपहसितः। 'केशकर्तनशालायां भवतः दर्शनं भविष्यति' इति तेन उक्तम्!

**काव्या-:** कीदृशः अयम् उपहासः अध्यक्षमहोदयेन कृतः! सः वार्ताहरः स्तब्धः जातः। अधुना अन्तिमां वार्तां पश्यतु। केरलराज्यस्य गुरुवायूर-मन्दिरे एकस्मिन्नेव दिने सप्तत्रिंशदधिक-चतुश्शतं विवाहाः सम्पन्नाः! पुरोहितैः दिवसं व्याप्य अविश्रान्तं कार्यं सम्पादितम्। **नन्दिनी-:** एकस्मिन् दिने एतावन्तः विवाहाः कथं निर्व्यूढाः इति चिन्तयित्वा मया विस्मयः अनुभूतः! पुरोहिताः नितरां श्रान्ताः जाताः। अद्य एतावत्यः एव विचित्राः वार्ताः। धन्यवादः काव्ये!

**काव्या-:** धन्यवादः नन्दिनि! सर्वैः प्रेक्षकैः अपि अद्यतनः कार्यक्रमः दृष्टः इति हेतोः तेभ्यः अपि शुभं भूयात्। पुनर्मेलिष्यामः!

**-ईदर धीरजः**

# बिहारवार्ता-: स्वास्थ्यमन्त्रिणः, बीएमएसआईसीएल -निदेशकस्य, पीएमसीएच-अधीक्षकस्य तथा बाह्यस्रोतः-सुरक्षा-अभिकरणस्य दुरभिसन्धेः विरुद्धम् उच्चैः घोषणम्



**■ पीएमसीएच-चिकित्सालये नियुक्त्याख्यया बाह्यस्रोतः-सुरक्षा-अभिकरणेन (Outsource Agency) पञ्चविंशतिसहस्र-(२५,०००) रूप्यकाणाम् अवैधधनसंग्रहणं विरुद्ध्य सेवा-सुरक्षायाः, सर्वेषां २०० परिचारकाणां (वार्ड-अटेंडेंट-कर्मिणाम्) अशर्तं कार्य-नियोजनस्य, श्रम-नियमानां च कठोर-पालनाय ऐक्टू-सम्बद्धानां कर्मिणां तीव्रः विरोध-प्रदर्शनम्**

**■ निगम-शासनस्य (Company Raj) तथा कम्पन्यभिकरणस्य स्वेच्छाचारितायाः विरुद्धं सङ्घर्षः निरन्तरं प्रवर्तिष्यते — ऐक्टू**

**■ स्वास्थ्यमन्त्री, श्रमायुक्तः तथा बीएमएसआईसीएल-निदेशकश्च पूर्वतः कार्यरतानां परिचारकाणां सेवा-सुरक्षां, पञ्चविंशतिसहस्र-रूप्यकाणाम् अवैध-संग्रहण-प्रतिबन्धं, न्यूनतम-वेतनं तथा च अतिकालिक-वेतन-(Overtime)-नियमानां कठोर-पालनाय प्रतिज्ञां कुर्वन्तु — रणविजयकुमारः, ऐक्टू**

**पाटलिपुत्रम्, २४ आगस्ट् २०२६ राघव नाथ झा, हिमसंस्कृतवार्ता**

पीएमसीएच-चिकित्सालये बाह्यस्रोतः-माध्यमेन परिचारक-पदेषु (वार्ड-अटेंडेंट) अन्यपदेषु च नवनिर्वाचितया 'इन्टेलिजेंस सिक्योरिटी' इत्याख्यया अभिकरणेन नियुक्त्याख्यया पूर्वतः कार्यरतेभ्यः कर्मिभ्यः पञ्चविंशतिसहस्र-(२५,०००) रूप्यकाणाम् अवैधधनसंग्रहणं विरुद्ध्य, सेवा-सुरक्षां, सर्वेषां २०० परिचारकाणाम् अशर्तं कार्य-नियोजनं, श्रम-नियमानां कठोर-पालनं च उद्दिश्य ऐक्टू-सम्बद्धैः पीएमसीएच-परिचारकैः अद्य गङ्गा-पथवे स्थितस्य पीएमसीएच-मुख्यद्वारस्य समक्षम् ऐक्टू-महासचिवस्य रणविजयकुमारस्य नेतृत्वे होराः यावत् रोषपूर्णं प्रदर्शनं कृतम्। उल्लेखनीयम् अस्ति यत् बीएमएसआईसीएल (BMSICL) द्वारा पीएमसीएच-परिसरे बाह्यस्रोतः-माध्यमेन मानवबलं प्रदातुं चयनिता 'इन्टेलिजेंस सिक्योरिटी' नाम्नी संस्था पूर्वतन-अभिकरणस्य 'फ्रन्टलाइन (एनसीआर) बिजनेस सॉल्युशन्स' इत्यस्य अधः वर्षाणि यावत् कार्यरतान् प्रायः २०० परिचारकान् २५,००० रूप्यकाणाम् अवैध-राशि-दानस्य शर्तेन कार्ये नियोक्तुं मनमानम् आदेशम् अकरोत्, यस्य विरुद्धम् अद्य ऐक्टू-सङ्घटनात् युक्ताः शताधिकाः परिचारकाः प्रदर्शनम् अकुर्वन्।

प्रदर्शनस्य माध्यमेन बाह्यस्रोतः-परिचारकैः अस्याः मनमान्याः अवैध-संग्रहणयाश्च तीव्रः विरोधः कृतः। पूर्वतः कार्यरतेभ्यः कर्मिभ्यः सेवा-सुरक्षां दातुं, निःशुल्कम् अशर्तं च कार्ये स्थापयितुं, अर्धकुशल-कुशल-श्रेण्याः न्यूनतम-मजूरीं तथा अतिकालिक-पारिश्रमिक-(Overtime)-नियमान् दृढतया प्रवर्तयितुं, अवकाशं, पीएफ् (PF), ईएसआईसी (ESIC) इत्येतेषां लाभान् सुनिश्चितान् कर्तुं च उच्चैः स्वरः उत्थापितः।

अस्मिन् प्रदर्शने शताधिकाः परिचारकाः भागम् अगृह्णन्। विशेषतः ऐक्टू-सम्बद्धस्य 'पीएमसीएच वार्ड अटेंडेंट वर्कर्स सङ्घर्ष-मोर्चा' इत्यस्य विकासकुमारः, अमितकुमारः, मोहितकुमारः, मिथिलेशकुमारः, रिशुकुमारः, आदर्शकुमारः, मानस्वी, रीनाकुमारी, अनीताकुमारी, रागिनीकुमारी च नेतृत्त्वम् अकुर्वन्।

अस्मिन् अवसरे प्रदर्शनकारिणः स्वास्थ्यमन्त्रिणः, बीएमएसआईसीएल-निदेशकस्य, पीएमसीएच-अधीक्षकस्य, बाह्यस्रोतः-अभिकरणस्य च दुरभिसन्धिं विरुद्ध्य उच्चैः घोषाः कृताः। कर्मिणः "कम्पनी-राजं न सहिष्यते", "इन्टेलिजेंस-अभिकरणस्य पीएमसीएच-अधीक्षकस्य च स्वेच्छाचारात् २५,००० रूप्यकाणाम् अवैध-संग्रहण बन्धा भवतु", "स्वास्थ्यमन्त्री निशांतकुमारः सचेतनो भवतु", "नियुक्ति-नाम्नि धांधली बन्धा भवतु", "सर्वेभ्यः कर्मिभ्यः अशर्तं कार्यं दीयताम्", "न्यूनतम-मजदूरी, अतिकालिक-वेतनं, पीएफ्, बोनस-विधानानि च कड़ाई-पूर्वकं प्रवर्तयन्तु" इति विविध-घोषवाक्यैः परिसरं गुञ्जितम् अकुर्वन्।

गङ्गा-पथवे स्थितस्य पीएमसीएच-द्वारस्य समीपे सञ्जातां सभां सम्बोधयन् ऐक्टू-महासचिवः रणविजयकुमारः स्वास्थ्यमन्त्रिणि कम्पन्यभिकरणेभ्यः मनमानीं कर्तुं स्वातन्त्र्य-दानस्य आरोपम् अकरोत्। सः स्वास्थ्यमन्त्रिणः, बीएमएसआईसीएल-निदेशकस्य, पीएमसीएच-अधीक्षकस्य, नवचयनित-अभिकरणस्य च मध्ये सांठगांठ-आरोपं कुर्वन् २५,००० रूप्यकाणाम् अवैध-संग्रहण-प्रयासस्य निन्दां कृतवान्। सः अवदत् यत् अस्य धनस्य किमपि रसीद-पत्रं न दीयते, धनदाने असमर्थे सति कार्य-निष्कासनस्य भयं प्रदर्श्यते।

ऐक्टू-नेत्रा रणविजयकुमारेण पूर्वतन-संस्थायाः 'फ्रन्टलाइन' इत्यस्याः अधीने कार्यरतानां २०० परिचारकाणां सेवा-सुरक्षायाः, २५,००० रूप्यकाणाम् अवैध-संग्रहण-प्रतिबन्धस्य, श्रम-नियमानां कठोर-पालनाय च स्वास्थ्यमन्त्रिणे, बीएमएसआईसीएल-प्रबन्धनिदेशकाय, श्रमायुक्ताय च पत्रं समर्प्य मागधानां पूर्णतायाः याचना कृता।

ऐक्टू-नेत्रा रणविजयकुमारेण स्पष्टीकृतं यत् यदि अस्मिन् विषये सत्वरं संज्ञानं गृहीत्वा अवैध-संग्रहण न स्थग्यते तथा च २०० परिचारकेभ्यः निःशुल्क-कार्य-सुरक्षा न दीयते, तर्हि इदम् आन्दोलनं तीव्रतरं कृत्वा अग्रे नेष्यते।

# पाटलिपुत्रे पीडीएस-विक्रेतृणां महाधरणा-प्रदर्शनम्, मागधानां समर्थने तीव्रः विरोधः समर्थनाय विपक्षनेता तेजस्वी यादवः धरनास्थलं प्राप्तवान्



पाटलिपुत्रम्, २४ आगस्ट् २०२६
राघव नाथ झा, हिमसंस्कृतवार्ता

राजधान्याः पाटलिपुत्रस्य गर्दनीबाग-क्षेत्रे सोमवासरे 'फेयर प्राइस डीलर एसोसिएशन' इत्यस्य प्रदेश-महामन्त्रिणः दयानन्द-प्रसादस्य तथा अम्बिका-यादवस्य च नेतृत्वे पीडीएस-विक्रेतृणां (सार्वजनिक-वितरण-प्रणाली-विक्रेतृणां) महाधरणा-प्रदर्शनम् आयोजितम् अभवत्। राज्यस्य सर्वेभ्यः मण्डलेभ्यः (जनपदेभ्यः) बहवः विक्रेतारः समुपस्थिताः अभवन्। विक्रेतारः स्वस्य प्रलम्बित-वेतनम् (मानदेयम्), अनुकम्पा-नियुक्तौ आयुःसीमा-बाध्यतायाः समाप्तिम् इत्यादीन् विषयान् पुरस्कृत्य एकत्रिताः भूत्वा शासनस्य विरुद्धं तीव्रं प्रदर्शनम् अकुर्वन्। प्रदर्शनकारिणः प्रलम्बित-मार्जिन-धनराशेः, कमीशन-भुगतानस्य च सह विक्रेतृणां विविधानां समस्यानां समाधानार्थं याचनाम् अकुर्वन्।

महाधरणा-स्थलं प्राप्तवान् विपक्षनेता तेजस्वी यादवः पीडीएस-विक्रेतृणां मागधानां समर्थनं कुर्वन् तेषां समस्याः न्यायसङ्गताः इति अकथयत्। सः विक्रेतृणां मागधान् दृढतया उद्घोषयितुं तेषाम् अधिकाराणां सङ्ग्रामे तैः सह स्थातुं च विश्वासम् अयच्छत्।

गर्दनीबाग-क्षेत्रे विक्रेतृणां महत्या संख्यया उच्चैः कृतैः घोषैश्च समग्रः परिसरः प्रतिध्वनितः जातः। सङ्घस्य वक्ता शशिकान्तः अवदत् यत् दीर्घकालात् समस्यानां समाधानं न जातम्, अतः अधुना इदम् आन्दोलनं तीव्रतरं करिष्यते। नेतृभिः सङ्घटनस्य पदाधिकारिभिश्च विक्रेतृणाम् ऐक्यमेव आन्दोलनस्य बृहत्तमा शक्तिः इति प्रतिपादितम्।

आन्दोलनस्य समये वरिष्ठनेतारः घनश्याम-प्रसादः, दशरथ-पासवानः, शशिकान्तः, रणजीत-कुमारः, पश्चिम-चम्पारणतः मिथिलेश-प्रसादः, समस्तीपुरतः वीरेन्द्र-सिंहः, फैयाज-आलम्, नवादातः नवीन-कुमारः, गयातः महेन्द्र-सिंहः, विजय-यादवः, विगन्-शर्मा, जहानाबादतः अरविन्द-शर्मा इत्येतेषां सह बिहारस्य सर्वेभ्यः मण्डलेभ्यः आगताः पीडीएस-विक्रेतृ-नेतारः जनसमूहं सम्बोधितवन्तः।

# जर्मनभाषाभ्यां देववाणीसंस्कृतपर्यन्तं डीपीएस-बोकारोस्य साहित्योत्सवे विद्यार्थिनां प्रतिभाप्रदर्शनम्




**बोकारो,सौरभः दे, हिमसंस्कृतवार्ता।**

## वैश्विकनागरिकत्वाय भाषासु दृढा दक्षता आवश्यकी – डॉ. गङ्गवारः

बोकारोः विद्यार्थिषु भाषासाहित्ययोः प्रति रुचेः संवर्धनाय तेषां बौद्धिकस्तरस्य च विकासाय दिल्ली-पब्लिक-स्कूल् (डीपीएस), बोकारो इत्यत्र आयोजितः षड्दिवसीयः साहित्योत्सवः-२०२६ शनिवासरे देववाणी-संस्कृत-साहित्यप्रतियोगितया सह सम्पन्नः अभवत्। षड्दिनात्मकस्य अस्य ज्ञानमन्थनस्य कार्यक्रमे विद्यालयस्य छात्राः छात्राश्च विदेशीयाभ्यां फ्रेञ्च-जर्मनभाषाभ्यां आरभ्य वैश्विकभाषायाः आङ्ग्लभाषायाः, राष्ट्रभाषायाः हिन्दीभाषायाः तथा सनातनचेतनायाः आधारभूतायाः संस्कृतभाषायाः पर्यन्तं स्वकीयां असाधारणां भाषादक्षतां, समृद्धं शब्दभाण्डारं, वाक्पटुतां तार्किकचिन्तनं च प्रदर्शितवन्तः।

उत्सवस्य शुभारम्भः अन्तरसदनीयया फ्रेञ्च-साहित्यप्रतियोगितया अभवत्। प्रसिद्धस्य फ्रेञ्च-साहित्यकारस्य विक्टर-ह्यूगो-महोदयस्य ओजस्विनां कवितानां सस्वरपाठेन षड्चक्रात्मकया बौद्धिकप्रश्नोत्तरीप्रतियोगितया च विद्यार्थिभिः फ्रान्सदेशस्य इतिहासे सभ्यतायां च स्वकीयां दक्षतां प्रदर्शिता। अस्यां प्रतियोगितायां रावी-सदनं प्रथमस्थानं, सतलज-सदनस्य दलं द्वितीयस्थानं तथा चेनाब-सदनस्य दलं तृतीयस्थानं प्राप्तवन्तः।

द्वितीयदिने डेर डोयचर कार्निवल्-४.० इत्यस्य अन्तर्गतं आयोजितायां जर्मन-साहित्यप्रतियोगितायां भारत-जर्मनीदेशयोः मैत्रीभावस्य जीवन्तं दर्शनम् अभवत्। भारत-जर्मनीदेशयोः सङ्गीतस्य, नृत्यस्य, वेशभूषायाः च प्रदर्शनानन्तरं उभयोः देशयोः भूगोलम्, अर्थव्यवस्था, साहित्यं च आधृत्य पञ्चचक्रात्मकः प्रश्नोत्तरी-कार्यक्रमः आयोजितः। अस्मिन् जमुना-सदनं प्रथमस्थाने स्थितम्, चेनाब-रावी-झेलम-सदनानां दलानि संयुक्तरूपेण द्वितीयस्थानं प्राप्तवन्ति।

तृतीयदिने आयोजितायाम् आङ्ग्लभाषायाः अन्तरसदनीय- स्पेलिङ्ग्-प्रतियोगितायां विद्यार्थिभिः जटिलशब्दसम्बद्धाः प्रश्नाः सहजतया समाधाय स्वकीयां शब्दसम्बद्धां प्रतिभां प्रदर्शिता। अस्यां जमुना-सदनं प्रथमं, सतलज-सदनं द्वितीयं तथा रावी-सदनं तृतीयं स्थानं प्राप्तवन्ति। चतुर्थदिने आयोजिते आङ्ग्लभाषायाः वादविवादे पारम्परिकशिक्षाव्यवस्थायाः स्थाने कौशलाधारितशिक्षायाः स्थापनम् इति विषये विद्यार्थिभिः स्वकीयां वाक्पटुतां तार्किकप्रखरता च प्रदर्शिता। अस्मिन् झेलम-सदनस्य अनुष्का शर्मा प्रथमस्थानं, तस्यैव सदनस्य कुमारी खुशी द्वितीयस्थानं तथा चेनाब-सदनस्य रुचि ठाकुरः तृतीयस्थानं प्राप्तवती।

पञ्चमदिने अन्तरसदनीयायां हिन्दी-वादविवादप्रतियोगितायां एकविंशतितमशताब्द्याः ज्वलन्ते विषये— "क्रिप्टो-मुद्रायाः वर्धमानः प्रचलनः : भविष्यस्य मुद्रा उत प्रपञ्चः?"—ओजस्विनं मन्थनम् अभवत्। पक्षसमर्थकैः विद्यार्थिभिः क्रिप्टो-मुद्रा एकशतनवदेशानां प्रौद्योगिकी-आधारितां वित्तीयक्रान्तिः इति प्रतिपादिता। अपरतः विपक्षस्य प्रतिभागिभिः तां नियन्त्रणारहितां, आकर्षकां किन्तु डिजिटल-छलनां तथा अस्थिरां मुद्रां प्रतिपाद्य सशक्ताः तर्काः प्रस्तुताः। प्रभावपूर्णाभिव्यक्त्या तथ्याधारितया प्रस्तुत्या च चेनाब-सदनस्य शिप्रा हेम्ब्रम् विजेत्री अभवत्। जमुना-सदनस्य अनुष्का आर्या द्वितीयस्थानं तथा गङ्गा-सदनस्य शांभवी झा तृतीयस्थानं प्राप्तवत्यौ।

अस्य भाषामहोत्सवस्य अन्तिमे दिने शनिवासरे आयोजितायां संस्कृत-साहित्यप्रतियोगितायां विद्यार्थिभिः श्लोकोच्चारणे संस्कृतस्य व्यावहारिकज्ञाने च उत्कृष्टं प्रदर्शनं कृतम्। तेषां प्रस्तुत्या सभागारः देववाण्याः संस्कृतभाषायाः मधुरध्वनिना पावनः अभवत्।

# सतत परिवहनस्य अन्तर्राष्ट्रीय-अभियाने डीपीएस बोकारो विद्यालयस्य सहभागिता, नाइजीरियादेशीयेन विद्यालयेन सह सहयोगः

**बोकारो,सौरभः दे, हिमसंस्कृतवार्ता।**

## विद्यार्थिभिः 'ग्रीन व्हील्स' इति जागरूकता-रैलिद्वारा हरितपरिवहनस्य सन्देशः प्रसारितः

बोकारोनगरम्। शिक्षां केवलं विद्यालयस्य परिसरे पाठ्यक्रमे च सीमितां न स्थापयित्वा विद्यार्थिषु वैश्विकदृष्टेः, अन्तर्राष्ट्रीयानुभवस्य, समकालीनवैश्विकसमस्यानां च विषये जागरूकतां वर्धयितुं दिल्ली-पब्लिक-स्कूल, बोकारो इत्यनेन एकं महत्त्वपूर्णं पदं स्वीकृतम्। ब्रिटिश-काउन्सिल-संस्थायाः प्रतिष्ठितस्य RIDS (Recognition of International Dimensions in Schools) कार्यक्रमस्य अन्तर्गतं डीपीएस बोकारो विद्यालयेन पर्यावरणसंरक्षणस्य 'सततपरिवहनस्य' (Sustainable Transportation) च महत्त्वपूर्णे वैश्विकविषये नाइजीरियादेशस्य प्रसिद्धेन क्रेस्टफोर्थ-इण्टरनेशनल-स्कूलेन सह अन्तर्राष्ट्रीयसाझेदारी स्थापिता। अस्याः साझेदार्याः अन्तर्गतं विद्यार्थिभिः जागरूकतारैलिः, जागरूकतासर्वेक्षणम्, पोस्टरनिर्माणम्, प्रश्नावलिनिर्माणम्, कार्यदैनन्दिनी-निर्माणम् इत्यादिषु विविधासु गतिविधिषु उत्साहपूर्वकं सहभागिता कृता।

अभियानस्य अन्तर्गतं 'ग्रीन व्हील्स' नामिका जागरूकतारैलिः आयोजिता, यस्यां डीपीएस बोकारो विद्यालयस्य अनेकाः छात्राः भागं गृहीतवन्तः। हस्तेषु विविधवर्णीयान् घोषवाक्यान्, पोस्टर्-चित्रफलकानि, ध्वजफलकानि, आकर्षकानि च सूचनाफलकानि धारयन्तः छात्राः सेक्टर-४ स्थितात् विद्यालयपरिसरात् प्रस्थानं कृत्वा लक्ष्मी-मार्केट् इत्यादीन् नगरस्य प्रमुखान् क्षेत्रान् अगच्छन्। रैल्याः माध्यमेन विद्यार्थिभिः सामान्यजनान् निजीवाहनानां विवेकपूर्णप्रयोगस्य, कार्बन-उत्सर्जनस्य न्यूनीकरणस्य, साइकिलयानस्य प्रयोगस्य तथा सार्वजनिकपरिवहनस्य स्वीकरणस्य च विषये जागरूकाः कृताः।

अभियानस्य अत्यन्तं महत्त्वपूर्णः भागः नाइजीरियादेशीयस्य उक्तविद्यालयस्य विद्यार्थिभिः सह आयोजितः रोचकः दृश्यसंवादः आसीत्। डिजिटल्-पटलस्य माध्यमेन भारत-नाइजीरियादेशयोः विद्यार्थिनः परस्परं सम्बद्धाः अभवन्। ते केवलं स्व-स्वदेशयोः भौगोलिक-सामाजिकपरिस्थितीनां विषये विचारविनिमयं न कृतवन्तः, अपि तु सततं हरितपरिवहनं प्रवर्धयितुं व्यावहारिकोपायानां, नवीनप्रयोगाणां च विषये ज्ञानस्य आदानप्रदानमपि कृतवन्तः। अस्याः साझेदार्याः आगामीचरणे नाइजीरियादेशीयेन विद्यालयेन आयोजिताः विविधाः गतिविधयः परियोजनाश्च डीपीएस बोकारो विद्यालयेन सह सार्वजनिककृताः भविष्यन्ति।






## पर्यावरणसंरक्षणं सर्वेषां सामूहिकं नैतिकं च दायित्वम् – प्राचार्यः डॉ. ए. एस. गंगवारः

वैश्विकभविष्यस्य संरक्षणे अस्याः पहलस्य महत्त्वं प्रतिपादयन् विद्यालयस्य प्राचार्यः डॉ. ए. एस. गंगवारः अवदत् यत् पर्यावरणस्य संरक्षणं सर्वेषां सामूहिकं नैतिकं च दायित्वम् अस्ति। भाविपीढ्यै हरितं, स्वच्छं, स्वस्थं च पृथिवीग्रहं निर्मातुं तदैव शक्यते, यदा वयं स्वजीवनशैल्यां हरितं सततं च परिवहनं महत्त्वपूर्णरूपेण समावेशयेम। डीपीएस बोकारो विद्यालयः स्वविद्यार्थिनः केवलम् अकादमिक्-उत्कृष्टतायै न सीमयति, अपि तु तान् अन्तर्राष्ट्रीयपटलस्य उत्तरदायिनः संवेदनशीलाः च 'वैश्विकनागरिकाः' कर्तुं निरन्तरं वैश्विकावसरान् प्रददाति।

# सहायक-प्राध्यापक-नियुक्तौ बृहन्निर्णयः

# २०२६ तमवर्षस्य परिनियमः स्थगितः,

## पञ्चदशदिनेषु उच्चस्तरीय-समीक्षा-समितेः गठनम्



**■ लोकभवने राज्यपाल-महोदयेन सह घटिकाद्वयं यावत् वार्तायाः अनन्तरं सहमतिः जाता**

**■ संशोधनं यावत् नियमित-संविदा-नियुक्तिषु पूर्ण-प्रतिबन्धः; एकविंशतिदिनेभ्यः प्रचलन्तम् अनशनं समापयितुम् आश्वासनम्**

पाटलिपुत्रम्, २४ आगस्ट् २०२६
राघव नाथ झा, हिमसंस्कृतवार्ता।

बिहारे सहायक-प्राध्यापक-नियुक्ति-परिनियमम् (२०२६) अधिकृत्य प्रवृत्तः गतिरोधः सोमवासरे समाप्तः अभवत्। गर्दनीबागे एकविंशतिदिनेभ्यः आमरणानशने उपविष्टानाम् अभ्यर्थिनां षट्-सदस्यीय-प्रतिनिधिमण्डलेन लोकभवने राज्यपाल-महोदयेन सह प्रायः घटिकाद्वयं यावत् गहनवार्ता कृता। वार्तानन्तरं राज्यपाल-सचिवालयेन २०२६ तमवर्षस्य नियुक्ति-परिनियमं सद्यः प्रभावेण स्थगितुम् आदेशः निर्गतः। अनेन सहैव अनशनकारिणः छात्राः स्वानशनं समापयितुम् आश्वासनम् अयच्छन्।

राजभवनेन प्रसारितायाः वार्ता-विज्ञप्तेः (संख्या-१६८/२०२६) अनुसारेण, यावत् परिनियमे आवश्यकं संशोधनं न भवति, तावत् अस्य आधारेण कापि नियमित-संविदा-नियुक्तिः न करिष्यते।

वार्तायाः ६ प्रमुखाः निर्णयाः सहमतेः बिन्दवश्च:

पञ्चदशदिनेषु उच्चस्तरीयसमितिः गठीयिष्यते: राज्यपालः मुख्यमन्त्रिणा सह मन्त्रणानन्तरं पञ्चदशदिनानाम् अन्तः एकां विशिष्टसमितिं गठयिष्यति। अस्यां बिहारस्य प्रमुखाः शिक्षाविदः उच्चशिक्षा-प्रशासनस्य च अनुभवयुक्ताः वरिष्ठाः प्रशासकाः सम्मिलिताः भविष्यन्ति।

पञ्चपञ्चाशत् (५५) वर्षपर्यन्तम् उच्चतमायुःसीमायां विचारः: सहायक-प्राध्यापक-नियुक्तये उच्चतमायुःसीमा ५५ वर्षाणि करणीयेति प्रार्थनायां समितिः विचारं करिष्यति। छात्रैः सुझावः दत्तः यत् आयुःसीमाम् एकदैव न्यूनीकर्तुः स्थाने शनैः शनैः न्यूनीकर्तव्या तथा च प्रतिवर्षं रिक्तपदानां विरुद्धं नियता नियुक्तिः प्रकाशनीया।

वस्तुनिष्ठ-परीक्षया एपीआई (API) इति आधारेण च संयुक्ता योग्यतासूची (Merit List) रचयिष्यते: नियुक्तये वस्तुनिष्ठा (MCQ/Objective) लिखिता परीक्षा आयोजयिष्यते। अत्र सफलाभ्यर्थिनाम् एपीआई-अङ्कान् लिखितपरीक्षा-अङ्कांश्च योजयित्वा संयुक्ता योग्यतासूची रचयिष्यते। अस्मिन्नेव आधारे निर्धारितानुपातेन अभ्यर्थिनः साक्षात्काराय अध्यापन-प्रदर्शनाय (Teaching Demo) च आह्वयिष्यन्ते।

- एपीआई (API) इत्यस्मात् दशम-द्वादशश्रेण्याः अङ्कानां निष्कासनस्य प्रार्थना: एपीआई-गणनायाः म्याट्रिक् (१०वीं) इन्टर्मीडियेट् (१२वीं) इत्येतयोः अङ्कान् बहिः स्थापयितुं प्रस्तावः अस्ति।
- नेट् (NET) जेआर्एफ् (JRF) इत्यनयोः अधिमानता (Weightage) अधिकतम् ११ अङ्कपर्यन्तं सीमिता भवितुम् अर्हति।
- शोधोपाधेः (PhD) अधिमानता कस्यामपि स्थितौ ३० अङ्केभ्यः न्यूना न भविष्यति।
- शोधप्रकाशनं कार्यानुभवश्च स्पष्टरूपेण परिभाषिष्येते येन नियमेषु पारदर्शिता तिष्ठेत्।
- अतिथि-प्राध्यापकेभ्यः (Guest Faculties) न्यूनतम-वेतनं महार्घता-भत्ता (DA) चः सम्प्रति नियुक्तानां संविदा-प्राध्यापकानाम् आधारे अतिथि-सहायक-प्राध्यापकेभ्यः अपि न्यूनतमं वेतनमानं तस्मिन् महार्घता-भत्तां दातुं विचारः भविष्यति। अनेन सहैव सर्वेषु विश्वविद्यालयेषु एका समाना नवीकरण-प्रक्रिया प्रवर्तयितुं प्रपत्राणां परीक्षानन्तरं पञ्चषष्टिवर्षं (६५) यावत् सेवावसरं दातुं सहमतिः जाता।

**प्रतिनिधिमण्डले एते सम्मिलिताः आसन्**

राज्यपाल-महोदयेन सह वार्ताकर्तृषु प्रतिनिधिमण्डले विधानपरिषदः सदस्यः (शिक्षक-प्रतिनिधिः) प्रो. जीवनकुमारः, डॉ. कुन्दनसिंहः (अतिथि-प्राध्यापकः), डॉ. उमेशकुमारः, डॉ. विभा रानी (अतिथि-प्राध्यापिका), आशीषकुमारः, मोनुकुमाररायः (शोधच्छात्रः) च सम्मिलिताः आसन्।

## अद्यतनविश्वस्य संजीवनी- योगः

अद्यतने व्यस्ततापूर्णे आधुनिकजीवने वर्धमानमानसिक- अवसादस्य मध्ये योगः संजीवनी इव अस्ति। योग शब्दः 'युज्' धातौः निष्पन्नः अस्ति, यस्य अर्थः 'संयोजनम्' भवति। महर्षिणा पतञ्जलिना उक्तम्- "अथ योगानुशासनम्" तथा "योगश्चित्तवृत्तिनिरोधः"। स्वामी विवेकानन्दस्य अनुसारम्- "प्रत्येकं प्राणी ईश्वरस्य एव अंशः अस्ति, अतः सर्वेषां योगमाध्यमेन ईश्वरप्राप्तेः अधिकारः वर्तते।" आधुनिकयुगे योगः शरीरमनात्मनां संतुलनस्य वैज्ञानिकी पद्धतिः अस्ति। अनेन अभ्यासैः रोगप्रतिरोधकक्षमतायाः वृद्धिः, मानसिकावसादात् मुक्तिः, आन्तरिक- चेतनायाः च जागरणं भवति। स्थिरप्रज्ञः, संयमी, निष्कामकर्मयोगी च भूत्वा एव साधकः महान् योगी भवति। अंततः "नित्यं योगाभ्यासेन एव जीवनं निरोगं, शान्तं, सार्थकं च भवति।"

**—प्रांजल ( कानपुरनगरम् , उत्तर प्रदेशः)**

# खादिविषये युवकेषु वर्धिष्यते जागरूकता,

## केन्द्रीयसंस्कृतविश्वविद्यालये संगोष्ठी-विवादप्रतियोगिते

हिमसंस्कृतवार्ताः — उत्तरप्रदेशसंस्करणम्।

**लखनऊ,२४ अगस्त २०२६।** खादी एवं ग्रामोद्योगस्य प्रोत्साहनाय युवानः स्वदेशी-आत्मनिर्भरताभावनया च योजयितुं 'खादी रिवोल्यूशन—नए भारत की नई खादी' इत्यन्तर्गतं लोकशिक्षणकार्यक्रमस्य आयोजनं कृतम्। अस्यैव क्रमस्य अन्तर्गतं केन्द्रीय संस्कृत विश्वविद्यालय, लखनऊ परिसरस्य कक्षसंख्या-३२ मध्ये एकदिवसीयस्य संगोष्ठी एवं वाद-विवाद-प्रतियोगितायाः आयोजनं २४ अगस्त २०२६ दिनाङ्के अभवत्। कार्यक्रमस्य शुभारम्भः वैदिकमङ्गलाचरणेन दीपप्रज्वलनेन च अभवत्। ततः राष्ट्रपितुः महात्मागान्धिनः प्रतिमायां माल्यार्पणं कृत्वा तस्मै श्रद्धाञ्जलिः समर्पिता। कार्यक्रमस्य आयोजनं राज्य कार्यालय, खादी और ग्रामोद्योग आयोग, लखनऊ, सूक्ष्म, लघु एवं मध्यम उद्यम मन्त्रालय, भारत सरकार इत्येताभ्यां कृतम्। कार्यक्रमस्य मुख्योद्देश्यं विद्यार्थिषु युवकेषु च खादी, स्वदेशी-उत्पादाः, ग्रामोद्योगः तथा आत्मनिर्भरभारतस्य विषये जागरूकतायाः संवर्धनम् आसीत्। कार्यक्रमस्य सञ्चालनं श्री आर.पी. विश्वकर्मणा कृतम्। अस्मिन् अवसरे इन्क्यूबेटर, जूट क्लस्टर इत्यस्य श्रीमती अञ्जलीसिंहः, NSCST HUP लखनऊ इत्यस्य श्री रवि ओरानः, KVIC लखनऊ इत्यस्य वरिष्ठकार्यकारी श्रीमती श्रुति अग्रवालः, खादी एवं ग्रामोद्योग आयोगस्य श्री कालीचरणप्रसादः, कार्यकारी श्रीमती दिव्या श्रीवास्तवा, तथा केन्द्रीय संस्कृत विश्वविद्यालय, लखनऊ परिसरस्य निदेशकः प्रो. सर्वनारायण झा, वरिष्ठाचार्यः प्रो. देवीप्रसादद्विवेदी इत्यादयः गणमान्याः उपस्थिताः आसन्। कार्यक्रमे विद्यार्थिभ्यः महात्मागान्धिनः विचाराः, स्वावलम्बनम्, खादी, ग्रामोद्योगः तथा सामाजिकदायित्वस्य विविधाः पक्षाः परिचिताः कारिताः। वक्तृभिः प्रतिपादितं यत् आत्मनिर्भरता तथा स्थानीयसंसाधनानां सदुपयोगस्य गांधीवादी अवधारणा अद्यापि प्रासङ्गिका वर्तते। विद्यार्थिनः स्वरोजगारस्य कौशलविकासस्य च दिशि अग्रे गन्तुं प्रेरिताः। वाद-विवाद-प्रतियोगितायां बी.ए. (ऑनर्स) संस्कृत एवं लोक सेवा अध्ययनस्य छात्रौ रासबिहारी एवं प्रणवः प्रथमस्थानं प्राप्तवन्तौ। मेघनाशुक्ला एवं अञ्जलीकुमारी द्वितीयस्थानं तथा जाह्नवी एवं नेहा तृतीयस्थानं प्राप्तवत्यौ। तदनन्तरं निबन्ध-प्रतियोगितायां प्रतीक्षामिश्रा एवं रूपालीसिंहः प्रथमस्थानं प्राप्तवत्यौ। सन्तोषझा एवं समृद्धिदेशपाण्डेयः द्वितीयस्थानं तथा आशीदुबे तृतीयस्थानं प्राप्तवान्। परिसरस्य निदेशकः प्रो. सर्वनारायणझा अध्यक्षीयोद्बोधने उक्तवान् यत् खादी केवलं वस्त्रम् न, अपितु स्वदेशी, स्वावलम्बनम् आत्मनिर्भरता च इति विचारधारायाः प्रतीकम् अस्ति। युवभिः शिक्षायाः कौशलस्य च माध्यमेन रोजगारप्राप्तेः सह रोजगारसृजनस्य दिशि अपि अग्रे गन्तव्यम्। स्थानीयसंसाधनानां, पारम्परिकज्ञानस्य तथा स्वदेशी-उत्पादानां प्रोत्साहनेन ग्रामीण-अर्थव्यवस्था सुदृढा भविष्यति तथा रोजगारस्य अवसराः वर्धिष्यन्ते। तेन विद्यार्थिभ्यः महात्मागान्धिनः स्वावलम्बनस्य श्रमप्रतिष्ठायाश्च विचाराणाम् अनुसरणाय आह्वानं कृतम्। खादी एवं ग्रामोद्योगः युवानां कृते स्वरोजगारस्य उद्यमितायाश्च प्रभावी माध्यमं भवितुमर्हतीति तेन प्रतिपादितम्। कार्यक्रमे परिसरस्य वरिष्ठाचार्यः प्रो. भारतभूषणत्रिपाठी, प्रो. अवनीशअग्रवालः, डॉ. कृतिरस्तोगी, अन्ये प्राध्यापकाः तथा परिसरस्य छात्र-छात्राश्च सहभागितां कृतवन्तः। कार्यक्रमस्य अन्ते परिसरनिदेशकेन विजेतृभ्यः प्रतिभागिभ्यश्च प्रमाणपत्राणि पुरस्काराश्च वितरितानि।

# भारतीसाहित्यपरिषद् बोकारोः तुलसीजयन्ती-सह- काव्यगोष्ठ्यां भक्तिरसस्य रसधारा






**हिमसंस्कृतवार्ताः- बोकारो।**
भारतीसाहित्यपरिषद्- बोकारोद्वारा रविवासरे सेक्टर-पञ्चमस्थे सद्गुरु- सदाफलदेव- आश्रमपरिसरे तुलसीजयन्ती-समारोहः सह काव्यगोष्ठी च आयोजिते। समारोहस्य शुभारम्भः मुख्यातिथिना सेल-संस्थायाः पूर्व- कार्यपालक- निदेशकेन उदयप्रतापसिंहेन, कार्यक्रमाध्यक्षेण वरिष्ठसाहित्यकारेण बुद्धिनाथझा-महोदयेन, संस्थायाः मुख्यसंरक्षकेण वरिष्ठसाहित्यकारेण सुखनन्दनसिंहेन 'सदय' महोदयेन, परामर्शकेन विजयशङ्करमल्लिकमहोदयेन, डॉ. श्यामसुन्दरप्रसादेन, दिनेशप्रसादसिंहेन, संस्थाध्यक्षेण डॉ. परमेश्वरभारती-महोदयेन, महामन्त्रिणा डॉ. मनोजकुमारसिंहेन, उपाध्यक्षेण ललनतिवारी-महोदयेन, संयुक्तमन्त्रिणा डॉ. रामनारायणसिंहेन, कोषाध्यक्षेण डॉ. राजेशप्रसादगुप्तेन, माध्यमप्रभारी अरुणपाठकेन, कविभिः कवयित्रीभिश्च गोस्वामिनः तुलसीदासस्य चित्रे माल्यार्पणेन पुष्पार्चनेन च कृतः। मुख्यातिथेः कार्यक्रमाध्यक्षस्य च संस्थायाः पक्षतः शालवस्त्रेण सत्कारः कृतः। अस्मिन् अवसरे कवयित्री गीताकुमारी सरस्वतीवन्दनां प्रस्तुतवती। गायिकाभ्यां रञ्जुसिंहेन निशापाठकेन च तुलसीदासविरचिताः भक्तिगीताः प्रस्तुताः। ताभ्यां वातावरणं भक्तिरसेन परिपूर्णं कृतम्। समारोहस्य प्रथमसत्रे वक्तृभिः गोस्वामिनः तुलसीदासस्य जीवनस्य तस्य कृतिनां च विषये विस्तरेण चर्चा कृता। वक्तारः अवदन् यत् तुलसीदासः भक्तिकाव्यस्य महान् कविरासीत्। तेन विरचितं महाकाव्यं रामचरितमानसम् न केवलं भारते, अपि तु वैश्विकस्तरेऽपि प्रसिद्धं प्रशंसितं च वर्तते। रामचरितमानसम् सहितासु अन्यासु रचनासु अपि तेन भारतीयसंस्कृतेः या व्याख्या कृता, सा अद्भुता अस्ति। भक्तिसाहित्यस्य सृजनार्थं सः सर्वदा आदरेण स्मरिष्यते। प्रथमसत्रस्य सञ्चालनं डॉ. रामनारायणसिंहेन कृतम्।
द्वितीयसत्रे डॉ. परमेश्वरभारती-महोदयस्य सञ्चालनने काव्यगोष्ठी आयोजिता। पूर्णेन्दुकुमारसिंहः, दीनानाथठाकुरः, करुणाकलिका, शैलजाझा, कस्तूरीसिन्हा, अमृताशर्मा, ज्योतिवर्मा, नीलमझा, रविशङ्करमिश्रः, रीनायादवः, डॉ. रञ्जनाश्रीवास्तवः, नीतुसिसौदिया, विजयशङ्करमल्लिकः 'सुधापतिः', मनोजनिशान्तः, मनोजोपाध्यायः 'सुमनजी', ललनतिवारी, अरुणपाठकः, सुदर्शनप्रसादः इत्यादयः कवयः कवयित्र्यश्च स्वकीयैः काव्यपाठैः उपस्थितान् सर्वान् आनन्दितवन्तः। कार्यक्रमस्य अध्यक्षः वरिष्ठसाहित्यकारः बुद्धिनाथझामहोदयः अवदत् यत् तेषां कृते अतीव प्रसन्नतायाः विषयः अस्ति यत् बोकारोनगरं साहित्यिकदृष्ट्या अद्यापि जीवन्तं वर्तते। अद्यतनायां गोष्ठ्यां कवीनां कवयित्रीणां च उत्साहपूर्णा उपस्थिति अत्यन्तम् आह्लादकरी अस्ति। कार्यक्रमस्य धन्यवादज्ञापनं माध्यमप्रभारी अरुणपाठकेन कृतम्। अस्मिन् अवसरे भुटकुनझा, शम्भुझा, आरतीसिंहः, खुशबू, गोविन्दमेहता, मदनठाकुरः, विश्वनाथझा, आश्रमव्यवस्थापकः नीतेशकुमारमहतो, सन्तोषकुमारमहतो इत्यादयः उपस्थिताः आसन्









**केन्द्रीय संस्कृत विश्वविद्यालय, लखनऊ परिसरे खादी उत्पादानां प्रदर्शन्याः आयोजनम्**




**डॉ. वर्षा प्रकाश टोणगांवकर पुणे/ महाराष्ट्रम्**

## द्वात्रिंशत्पुत्तलिकासिंहासनम्

**"अथ विप्रमनोथपूरणं नाम द्वितीयोपाख्यानम्" (१)**

पुनरपि राजा यावत् अन्यपुत्तलिकामस्तके पादपद्मं निदधाति, तावत् सा पुत्तलिका तथैव मनुष्यवाचा राजानमब्रवीत्- भो राजन्! विक्रमस्य शौर्यौदार्य्य-सत्तवादिकसादृश्यं यदि विद्यते तर्हि अस्मिन् सिंहासने समुपविश। भोजराजो वदति स्म- भो पुत्तलिके! कथय तस्य विक्रमस्य शौर्यौदार्य्यादि वृत्तान्तम्।
स कथयति- भो राजन्! श्रूयताम्- विक्रमादित्यः राज्यं पालयन् एकदा चाराना‌ह्याब्रवीत्- भो दूताः! भवन्तः पृथिवीपरिभ्रमणं कुर्वन्तः यत्र यत्र कौतुकं तीर्थविशेषश्च विलोकयन्ति, तन्मम निवेदयन्तु; अहं तत्र गमिष्यामि। एवं काले गते एकदा देशान्तरं परिभ्रम्य आगतः क्वचित् दूतो राजानमब्रवीत्- भो राजन्! चित्रकूटपर्वतनिकटे तपोवनमध्ये अतिमनोहरो देवास्तूयोऽस्ति। तत्र पर्वतोच्चस्थानात् विमला जलधारा पतति। तत्र स्नानं यदि क्रियते तर्हि सर्वेषां महापापानां क्षयो भवति; यस्तु महापापं करोति; तस्याङ्गादतीव कृष्णमुदकं निःसरति। यस्तत्र स्नानं करोति स पुण्यपुरुषः। अन्यच्च- तत्र कश्चित् ब्राह्मणः महति होमकुण्डे हवनं करोति, तस्य कियन्ति वर्षाणि अतीतानि इति न ज्ञायते। प्रतिदिनं कुण्डात् वह्निः स्थापितं भस्म पर्वताकारं सत् अस्ति। स ब्राह्मणः केनापि सह न सम्भाषते। एवमतिविचित्रतरं स्थानं दृष्टम्। तच्छ्रुत्वा स राजा एकाकी तेन सह तत् स्थानं गत्वा परमानन्दं प्राप्तोऽवादीत्- अहो! अतिपवित्रमेतत् स्थानम्; अत्र साक्षाज्जगदिम्बिका निवसति। एतत् स्थानं दृष्ट्वा मनो मे विमलं जातम् इत्युक्त्वा तन्त्रान्तरीत्तोदकस्नानं विधाय देवतां नमस्कृत्य यत्र ब्राह्मणो हवनं करोति तत्र गत्वा ब्राह्मणमवोचत्- भो ब्राह्मण! हवनामारभ्य कतिवर्षाणि जातानि? ब्राह्मणेनोक्तं- यदा सप्तर्षिमण्डलं रेवती नक्षत्रस्य प्रथमाचरणे स्थितं तदा मया हवनं प्रारब्धम्; इदानीमश्विनीनक्षत्रे तिष्ठति। होमं कुर्वतो मे वर्षशतमभूत तथाऽपि देवता प्रसन्ना नाभवत्।